नं० ४८५५

नाम — मंत्ररत्नाकरविवरणं मंत्ररत्नाकर महापोतः

कर्त्ता — विजयरामाचार्य, चतुर्भुजशिष्यः

पत्र सं० — ३२ पत्राणि सं० ×

विषयः — तंत्रम्

मंत्ररत्नाकर प्रथमतरंगविवरणम्

४८५५

पात्रेरी

पुस्तकमिदं [redacted]

४855 / ३२

मवरत्नाकर

६५०

पृ.ण

वश्ये

श्रीः मंत्ररत्ना १

श्रीगणेशाय नमः ॐ नमः सरस्वत्यै श्रीगुरुचरणकमलेभ्यो नमः ॐ शरण्यश्रीगुरोरंघ्रि
कमलोत्थात्रजःकणात् मंत्ररत्नाकरव्याख्यां वक्ष्ये संक्षेपतः शुभां १ अथ परमेश्वरः सर्वा
अपि स्वतो भवपाशबद्धानां जीवानां मुक्तये समुपदिशति स्म इतरेषां स्मृतिशास्त्रादीनां तु मू
लकत्वेन तदर्थप्रतिपादकत्वेन च प्रामाण्यमेवेति सिद्धं एषां तंत्राणां कथं तन्मूलकत्वं अ
मह्य स्मृत्यादिशास्त्रैरेव विशेषेण पर्यालोचितैर्मुक्तिः स्वर्गादिफलं वा भविष्यतीति किमेतै
स्तंत्रैरिति तत्राह स एतत्त्वं बहुस्यां प्रजायेति तथा यतो वा इमानि भूतानि जायंते येन जाता
नि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तदुपक्रम्य आनंदाद्ध्येव खल्विमानि भूतानि जायं
ते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीत्यादि इदं सर्वं यदयमात्मेत्यंतेनोपसंहृतं अ
तः उपक्रमोपसंहाराभ्यां सहकारिणा अनिर्वचनीयावस्थानासहितस्य परमानंदस्वरूपस्य

राम १

नित्यशुद्धबुद्धस्वभावस्य परब्रह्मण एव स्वात्मविवर्तरूपजगत्कर्तृत्वमिति श्रुतिवाक्यप्र
तिपादितोऽर्थः ननु सत्यं जगत्कर्तृत्वं परब्रह्मणः परं त्वनादिशक्त्यंगीकरणे श्रु[illegible]नं इति चे
६ न् न तत्तया सहकारिण्या विना तस्य शुक्रं किंचित्करणं इति श्रुत्यागमावपि वदतः इंद्रो मा
याभिः पुरुरूप ईयते इति शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यते शिवो हि शक्तिरहि
तः शक्तः कर्तुं न किंचनेति एवं ज्ञाते जगति पाशबद्धानामात्मनां अज्ञानां उत्पत्तिमरणप्रवा
हपतितानां स्वावरणविच्छित्तये स्वयमसमर्थानां नां पाशविमोचनाय परमकारुण्येन त
या किंचिदुपाधिविशिष्टः परमेश्वरः सर्वाः श्रुतीः समुपदिशति स्म तत्र तासु कर्मोपासनाज्ञा
नभेदेन कांडत्रयं तत्र कर्मकांडं जैमिनिप्रभृतिभिः सम्यक्तया विवृतं इदमुपासनाकांडं च नारदादि
भिः ज्ञानकांडं भगवद्व्यासादिभिरिति श्रुतिः शूलकनाम्य प्रत्यक्षेणोपलक्षातिमूलमंत्रेत्
श्रुतिमूलकत्वेन

श्रीवा ५

श्रीः
मंत्र
रत्ना
२

सिंहपूर्वोत्तरतापिनीयरामपूर्वोत्तरतापिनीयगोपालपूर्वोत्तरतापिनीयोक्तसौरशाक्तान्तरशैव
वा पंचरात्रादीनां मन्त्राणां श्रुतिमूलकत्वं तु सिद्धमेव ननु अत्र कर्मकाण्डे सर्वेषामप्यधिकारः मुमुक्षोरपि
तत्त्वज्ञानपर्यन्तं स्वचित्तशुद्ध्यर्थं प्रत्यवायपरिहारार्थं च कर्मकरणे योग्यत्वसंभवात् परं त्वत्र के
वलं कर्मकाण्डात्तु स्वर्गादिफलं बहुतरं सत्त्वांशेन भवति उपासनाकाण्डात्तु साकारोपासनतः
क्रमतो मुक्तिरेव स्वर्गादिफलमप्यानुषंगिकं अन्यच्च विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणै
रिति योगियाज्ञवल्क्यवाक्यात् यावन्तः कर्मयज्ञास्तु विचित्रफलभोगदाः सर्वे ते जपयज्ञस्य क
लां नार्हन्ति षोडशीमिति शातातपवाक्यात् यज्ञानां जपयज्ञोऽस्मीति भगवद्वाक्यात् सर्वेष्वपि यज्ञेषु
जपयज्ञस्यैव भगवत्स्वरूपकत्वेन मुख्यत्वात् सर्वेषां वर्णाश्रमाणां वेदानुकूलतन्त्रोक्तमन्त्रोपास राम २
नानुष्ठाने नित्यत्वे मुख्यत्वमावश्यकत्वं चास्तीति सिद्धं ननु स्वागमैः कल्पितैस्तैर्जनान्मद्विमुखा

रकूटरुद्र इति पद्मपुराणीयवाक्यात् कथं तंत्रोक्तसाधनस्य वैशिष्ट्यमिति चेन्नैतत्कल्पितपदो
पादानाद्यनाचारवीरशैववीरवैष्णवकौचुलिकपाकौलिकादिप्रतिपादकसंदर्भादीनामेवक
ल्पितत्वेन तत्त्वनादिनं त्राणं इतरथा तु यश्चाशुहृदयग्रन्थिं निर्जिहीर्षुः परात्मनः विधिनोपचरे
द्देवं तंत्रोक्तेन च केशवं लब्ध्वानुग्रहमाचार्यात्तेन संदर्शितागमः महापुरुषमभ्यर्चेदित्यादिवा
क्यानामनर्हतापत्तेः अतो वेदानुकूलतंत्रोक्तसदुपासनाकाण्डस्यैव वैशिष्ट्यं अन्यच्च उपास
नाकाण्डस्य देहलीदीपकन्यायेन कर्मकाण्डज्ञानकाण्डयोरप्यभिन्नत्वमस्ति उपासनाकाण्डं
विना केवलं ज्ञानकाण्डान्मुक्तिरपि आदरनैरन्तर्यदीर्घकालाभ्याससाध्यानेकेषु जन्मसु तन्नादृशेष्व
वगतेषु भवति अनेकजन्मसंसिद्धस्ततो याति परां गतिमित्यादिना चिरकालानुष्ठानफलजन
कत्वात् अतो वेदानुकूलतंत्रोक्तसदुपासनायास्त्विहैवाचिरेण शुद्धसत्त्वोऽस्य वैराग्यजन्मितत्त्वा

घो६

श्रीः मंत्र रत्ना र

तद्द्वारेण कैवल्यायपादकल्पाहं शिष्यं नेतरेषामिति सिद्धं तत्रतावत् श्रीमत् चतुर्भुजाचा
र्यपदपद्मपाद शिष्यश्रीविनयरामाचार्यः सर्वतंत्रेष्वेकैकमंत्रविधानप्रवर्त्तकेषु निचितनेषु ग
भीराशयेषु इदानींतनानाममल्पायुषामतिमंदमतीनां एकस्मिन् सर्वमंत्रविधानमभीप्सूनां
रि ४ उपकाराय शिष्टाचारपरिप्राप्तं प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्त्यर्थं सिद्धांतशास्त्रप्रवृत्ति
निमित्तं तत्त्वातीतपरमशिवचिंतनात्मकं मंगलं कृत्वा शिष्यशिक्षायै निबध्नाति यथा परमेश्वरं
गुरुं च नत्वाऽहं ग्रंथकरणे प्रवृत्तः तथाहमपीति पंचेनेति श्रीगुरुचरणकमलेभ्यो नमः
पंचैतेप्रभवंति पंचसु यतः सृष्ट्यादिकार्येष्वकः शार्ङ्गीरुद्रमुखाः स्वशक्तिकरणाः सुद्धाध
हेतौ परं तत्त्वातीतमनंतशक्तिविभवं नित्यं निरीहं विभुं संभाव्यं निखिलात्मभिः किमपि तत् राम
सूक्ष्मं महत्प्रोन्नतं ये १ एते पंचब्रह्मविष्णुरुद्रेश्वरसदाशिवाः यतो यस्मात् यद्वा यतोरण्या र

पंचस्वकृत्यसृष्टिस्थितिसंहारतिरोभावानुग्रहलक्षणेषु पंचसु कार्येषु प्रभवंति प्रभुताश्र
यीभूता भवंति अथवा यतः यस्मात् प्रभवंति प्रकटीभूता भवंति स्वशक्तिकरणाः एतेषु
पंचकृत्येषु स्वशक्तय एव करणानि येषां एतेषां शिवप्रेरितवामादिस्वस्वशक्तिद्वारेणैव
कार्यनिष्पत्तिः तदुक्तं ज्ञानार्णवे पंचप्रेतावरारोहे निश्चला एव सर्वदा ब्रह्मणः परमेशा
नि मातृवत्सृष्टिरूपकं वामाशक्तिस्तु विज्ञेया ब्रह्मा प्रेतो न संशयः शिवस्य करणं ना
स्ति शक्तेस्तु करणं सदा ब्रह्मांडलक्षनिर्वाणं जायते शक्तितः प्रिये अत एव महेशा
नि ब्रह्मा प्रेतो न संशयः विष्णुश्च निश्चलो देवि वैष्णवी व्याप्तिकारिणी पालयंती जगत्सर्वं
विश्वनाटककारिणी अत एव महेशानि विष्णुः प्रेतो न संशयः रुद्रस्तु परमं तत्त्वं शिवो निश्च
ल एव हि ग्रसंती रुद्रशक्तिस्तु तमोरूपा वरानने गुणत्रयं शिवे नास्ति गुणातीतो महे

श्रीः
मंत्र
रत्ना
८

५

श्वरः निर्गुणस्य कथं शास्ता निश्चलस्य चरात्मने । ग्रसंती रुद्रशक्तिस्तु त्रैलोक्यं सचराचरं
शुद्धाविद्यस्तु शुद्धस्वगुणातीताः सदाशिवे । सगुणस्तु महेशानि सृष्टिस्थितिलयात्मकाः
ईश्वरस्तु वरारोहे महात्मेन सदानघे । इत्यादिना पंचानामपि शक्त्याविद्याश्च किंचित्कर
त्वात् स्वशक्तिद्वारेणैव कार्यनिष्पत्तिः शुद्धाध्वहेतोरशुद्धाध्वहेतुविषये परं परमं कारण
मित्यर्थः एतच्च कृत्यपंचकं शुद्धाध्वविषये साक्षात् शिवकर्तृकं अशुद्धाध्वविषये तु अनन्त
ह्मा नादिद्वारेण निर्ज्ञेयं तदुक्तं श्रीमत्किरणे शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः त
त्र परमशिवस्य बिंद्वात्मकादुपादानात् साक्षात्सृष्टिः शुद्धभुवनोत्पादनं सर्वं तत्तद्भुवनवा
सिनां विद्याविद्येश्वराणां च वैंदवशरीरे योजनं नादादिक्रमेण शास्त्रोत्पादनं च अनंतादिद्वारेण राम
मायाख्योपादानादशुद्धतत्त्वभुवनाद्युत्पादनं सर्वकं पशुसंज्ञानां जीवानां च सूक्ष्मेणनात्वि ५

श्वर

कशरीरेण स्वकर्मानुगभोगनशरीरेण च योजनं मंत्रेश्वराणामधिकारनिबंधनं शरीरोत्पा
दनं च सृष्टिः स्थितिस्तु स्वशक्त्यानिरुद्धस्य सर्वजगतः स्वविषये ह्यवस्थापनं संहृतिस्तु शु
द्धाशुद्धकार्ययोर्बिंदुमाययात्मनोरूपसंहारः तिरोभावश्च पाशानुग्रहेणात्मनो यथानुगुण
भोगयोजनं अनुग्रहस्तु पाशनिरोधानेन तेषां जीवानां परापरमोक्षदानमिति ननु सृष्ट्या
दिपंचकृत्यकारित्वं तु विद्येशानामित्यत्र व्याख्यातं तत्कथं शिवस्येति नियमः उच्यते
तेषामपि शिवप्रेरणयैव पंचकार्यकर्तृत्वात्तथोक्तमित्यविरोधः तत्त्वातीतं तत्त्वेभ्यः परं
सर्वकर्तृत्वात् अनंतशक्तिविभवं अनंतः शक्तिविभवो यस्य यद्वा अनंतादीनां शक्तिविभ
वो यस्मात् नित्यं कालत्रयाबाधितं आद्यंतरहितं ननु बौद्धानामिव क्षणिकं उत्पत्तिकाले
एव नश्यतस्तस्य जगत्कर्तृत्वासंभवात् विभुं सर्वगतमित्यर्थः ननु क्षपणकादीनामिव शा

श्रीः रीरपरिमितः संकोचविकाशाद्यधर्मा वा इति चेन्न नादृशास्याचेतनत्वाद् अनित्यत्वदोषप्रसंगः
मंत्र निखिलात्मभिः [redacted] सकलाप्रलयाकलविज्ञानाकलैः संभाव्यं संचिन्त्यमाराध्यमित्यर्थः
स्तो शुद्धं मलमायाकर्मरहितं नित्यमुक्तं न तु मुक्तात्मवत् ईश्वरांतरप्रसादमुक्तं अनवस्थाप्र
४ संगात् एवंभूतं किमप्यनिर्वचनीयं महस्तेजः स्वप्रकाशरूपं न तु कर्मकालादीश्वरवादिना
5 मिव जडं अचेतनस्य चेतनाधिष्ठानं विना प्रवृत्त्ययोगात् एतेन न चास्य बैंदवशरीराभ्युपग
मो युक्तः अनीश्वरत्वप्रसंगात् तस्य च कर्त्रंतरापेक्षया स्वकृतत्वेन वानवस्थाप्रसंगात् ।
चिंतये चिंतयामीत्यर्थः १ एवं शिवचिंतनात्मकं मंगलमुपक्रम्य सकलज्ञानैककारणं
गुरुं नमस्करोति अविदितपरमेश्वराणामप्रणतगुरूणां च निर्विघ्नं ग्रंथाधिगमनासंभ राम
वात् वंदे नाथमिति वंदे नाथं सहस्रच्छदजठरलसच्चंद्रबिंबोदरस्थं संतापत्रासभाजांस ४
ने

कलनतनुभृतां पाशविच्छेदहेतुं इष्टाभीतीर्दधानं करकमलयुगे पुस्तक्षमाल्यान्तुलेपं शक्त्या
युक्तं स्ववामे निखिलभयहरं योगिभिर्ध्येयपादं २ नाथं शिवाधिकरणं गुरुं तं च योजयति परं
तत्वे सदीक्षया ग्राचार्ये मूर्तिस्थः संतापत्रासभाजं आधिभौतिकाधिदैवकाध्यात्मिकतापत्रु ग्र य ३
जं सकलानां मलमायाकर्मयुजां जीवानां पाशविच्छेदहेतुं पंचविधपाशाः मलकर्ममायेयाद्या
ग्रंथे वक्ष्यमाणास्तद्विच्छेदकारणं करकमलयुगे इष्टाभीतीवराभये दधानं युक्तमाल्यान्तुले
पंदीक्षाशक्तिपातेन जननमरणाद्यखिलभयहरं योगिभिर्ध्येयौ पादौ यस्य गुरुं तं च गुरुमुख्याः
क्रियाः सर्वा भुक्तिमुक्तिफलप्रदा इति एवंभूतं श्रीनाथं वसुर्भंजाचार्यं वंदे नमस्करोमि का
यवाङ्मनोभिः शक्तो भवामीत्यर्थः इत्यंशिष्टाचारविषयं मंगलं कृत्वा प्रतिपाद्यमर्थं प्रतिजानीते
सरहस्यानीति सरहस्यानि तंत्राणि ज्ञात्वा गुरुमुखांबुजात् साधूपकृतये वक्ष्ये मंत्ररत्नाकरं

श्रीः
मंत्र
रत्ना

6

सिद्धं गुप्तरहस्यानीति मंत्ररत्नाकरे त्वभिधायस्यतं साधूनां मुमुक्षूणां उपकाराय वक्ष्यामि गु
रुमुखाल्लब्ध्वा हृद्धि धिवन्मरहस्यानि तंत्राणि ज्ञात्वा नवपल्लवपोलकल्पने येन्यर्थः ३ सत्यप्यनेक
निबंधे स्य किं प्रयोजनमत आह सांकर्यमिति सांकर्यं संप्रदायानां ग्रंथेष्वाधुनिकेषु विलोक्य प्र वै ३
छुड्डविड संप्रदायोऽत्र कथ्यते ४ आधुनिकेषु स्वविदित संप्रदायज्ञानगेदरहस्यैर्विरचितेषु ग्रं
थेषु संप्रदायानां सांकर्यमवलोक्यास्मिन् शुद्धड्डविड संप्रदायो निरूप्यते संप्रदायज्ञानं विनासि
द्धेरसंभवात् संप्रदायास्तु ड्डविड गौड काश्मीरोपद्व्याख्याः चत्वारः तत्र पारंपर्यक्रमेन तत्तत्सं
प्रदायविहितानुष्ठाने नैव परा सिद्धिर्भवति ७ तंचोत्तरतंत्रे संप्रदायास्तु देवेशि चत्वारः कीर्ति
ता मया तत्रादौ ड्डविडः प्रोक्तो गौडः काश्मीरसंज्ञकः उपकरश्चेत्येते यास्तत्तत्तंत्रानुसारतः संप्र राम
दायमविज्ञाय भजते यश्च देवतां सिद्धिर्नजायते दे विविघ्नस्तस्य पदे पदे ८ अतः कथयामहे ज्ञानिभ

महातंत्रं प्रचक्षते ॥ पादाः पदार्थनिष्कर्षः संक्षेपेण त्र वर्ण्यते ॥ त्रयः पदार्थाः पतिपशुपाशाख्याः प्रतिपा
द्यत्वेन यस्मि २

त्मनूं संप्रदायतन्त्रइति ४ ग्रंथप्रयोजनमुक्त्वा अधुना प्रकरणप्रतिपाद्यमर्थं प्रतिजानीते त्रिप
दार्थं चतुष्पादं महातंत्रं जगुस्त्रिपदार्थं चत्वारः पादाः यस्मिन् तत् चतुष्पादं एतल्लक्षणं महातं
त्रं प्रचक्ष्यते तस्मात् अस्मिन् ग्रंथे पदार्थनिर्णयः पादाश्च संक्षेपेण वर्ण्यते महातंत्रमिति द
र्शनांतरेभ्योधिकफलत्वात् शिवभेदकत्वेन परत्वाद्वा महत्तंत्रं त्रिनतनत्रसमेयत्वात्तंत्रं ततश्च
एष्वेवान्येषां पदार्थानामंतर्भावः पाशात्सद्भावेष्यात्मनां जन्मस्थितिध्वंसतिरोभावानुग्रहरूपग
वानुभवतीति पतिपाशात्मव्यतिरिक्तं न किंचित् पदार्थांतरं प्रयोजनवत् इति त्रिपदार्थत्वमु
क्तं भोगमोक्षइति भोगमोक्षक्रियाचर्याभिधाः पादास्तु कीर्तिताः एतेषां लक्षणा[illegible] कथयि
ष्यामि तत्वतः भोगमोक्षक्रियाचर्याभिधाः पादास्तु कीर्तिताः एतेषां लक्षणाण्यग्रे कथयिष्या
मीति एतेषां लक्षणा[illegible]ह भोगपादो मोक्षपादः क्रियापादश्चर्यापादश्चेति चत्वारः पादाः एतेषां
णा

न्यग्रे ३

लक्षणनिग्रहे कथयिष्यामीति पदार्थनिर्णयं तत्र कथयामि समर्थं ततः पदार्थास्तु पतिपशु
पाशाख्याः त्रय एव हि ७ इदानीं पदार्थनिर्णयमाह तत्र प्रथमतः संक्षेपात् पदार्थास्तु पतिपशु
पाशाः एते त्रय एव [redacted] पतिस्तत्र शिवो ह्येकोऽपशव [redacted] ःस्मृताः पाशा पंचविधा ह्येषां प्रत्ये
कं लक्षणं ब्रुवे ८ तेषु तेषु पदार्थेषु प्रथमतः पतिपदार्थं तु जगज्जन्मस्थितिध्वंसतिरोभावान्तु
ग्रहकृत् भगवान् शिवः एकः अद्वितीयः ननु मंत्र मंत्रेश्वर मंत्रमहेश्वर मुक्तात्मनो शक्ति शिव
वाचकानां पतिपदार्थे संग्रहः कथ्यते सत्यं तेषामपि शिवशब्देनात्र जात्येकवचनत्वाद् द्वैवा
न्तर्भावः जीवा आत्मानः पाशाः च पंचविधाः पंचप्रकारका इत्यर्थः ८ तत्रादौ पशुलक्षणमाह
पशव इति पशवस्त्रिविधाः प्रोक्ताः के ते इत्याह ॥ पशवस्त्रिविधाः प्रोक्ता विज्ञानाकलसंज्ञकः राम
प्रलयाकलसंज्ञश्च सकलश्चेति नामतः २ [redacted] विज्ञानकलः प्रलयाकलः स

67

इति

कलश्च नामतः ज्ञेयाः तत्रेति तत्र तेषु मध्ये आद्यः विज्ञानाकलाख्यो वर्गः मलसंयु
क्तः विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षयात् कर्मणो भोगार्थस्य कलादिबंधस्या
प्यभावात्केवलेमलमात्रयुक्तः द्वितीयस्तु प्रलयाकलाख्यः प्रलयेन कलादेरुपसं
हारात् मलकर्मयुक्तो भवति सकलस्तु मलमायाकर्माख्यबंधत्रययुक्तः अत्र च मायारोहेन

तत्राद्यो मलसंयुक्तो मलकर्मयुतः परः मलमायाकर्मयुतस्तृतीयः परिकीर्तितः १० आद्यस्तु द्विविधस्तत्र स
मात्तकलुषस्तथा असमाप्तमलश्चेति द्वितीयोपि पुनस्तथा ॥

तत्कार्यभूताः कलादयः कथ्यन्ते मायायास्तु साक्षाद्बंधकत्वाभावः किंतु कार्यद्वारेणैव बंध
कत्वमिति अतः मायाकार्यकलायुक्तत्वादेवास्य सकलत्वं न तु कर्मणा शरीरस्थूलकत्वा
न्न तु देहस्य शरीरयोगासंभवात् सत्यं मलमात्रयुक्तोपि भेदः शास्त्रे श्रूयते किं च तत्रापि संस्का
रवशात् किंचित्कालं स्थितिसंभवत्येव तदुक्तं सांख्यैः तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृत

श्रीः
मंत्र
रत्ना
८

शरीरइति १० आद्येति तत्रतेषु आद्यो विज्ञानाकलवर्गः पुनर्द्विविधः द्विःप्रकारकः कौतौ भे
दावित्याह आद्यः समाप्तकलुषः समाप्तमलः द्वितीयस्त्व समाप्तमल इति मलस्य इत्यत्वे स
ति जडत्वाद्वस्तुः परस्यादेरिव पाकः संभवति ११ पक्वापक्वेति द्वितीयोपि तथा तादृशः द्विती
यप्रलयाकलः पक्वमलापक्वमलभेदेन द्विविधो भवति एतौ विज्ञानाकलप्रलयाकलौ द्वाव

पक्वापक्वमलेनैव द्विविधः परकीर्तितः शुद्धेऽध्वनि गतावेतौ विज्ञानप्रलयाकलौ १२ कला
दितत्त्वनियतः सकलः पर्यटत्ययं कर्मानुगः शरीरेषु नानाभुवनगतेषु च १३ पाशाः पंचविधाः
स्त्वत्र प्रथमो मलकर्मजौ मायेयश्च तिरोधानशक्तिजो बिंदुजः परः १४

पि शुद्धेऽध्वनि गतौ [illegible] प्राप्तौ शुद्धाध्वनिवासिनावित्यर्थः १२ कलेति कलादित्रिंशत्तत्त्वनियतः सु
कलः स तु नानाभुवनोत्पन्नेषु शरीरेषु कर्मानुगः तत्तत्कर्मवशात् पर्यटति १३ एवं पशुपदार्थं
प्रतिपाद्य पाशपदार्थभेदमाह पाशा इति पाशास्तु पंचविधाः पंचप्रकारका इत्यर्थः तत्र प्रथ

राम
८

मोमलकर्मजौ मलजः कर्मजइति द्वौ एवं मायेयः मायोत्पन्नकलादितत्वगण आगंतुकपाशः
कर्मसंज्ञावपूर्वं तस्य कलादेः संभवात् तिरोधायका शिवशक्तिजः बिंदुजश्च एवमेतेषां पंचा
नां बिंदुमायोद्भूतैः शुद्धाशुद्धरूपैस्तत्वभुवनतनुभावैः सह पाशपदार्थसंग्रहः ननु कथमे
कस्याः शक्तेः पतिपदार्थे पाशपदार्थे च संग्रहः उच्यते परमार्थतः पतिपदार्थ एव शक्तेरंतर्भा
वः [redacted] पाशत्वं तु नस्याः पाशधर्मानुवर्तनेनोपचारात् तदुक्तं मृगेंद्रसंहितायां तासां

एकोप्यनेकशक्तिर्दृक्क्रिययाच्छादको मलः तुषकंचुवद्देहनिमितं चात्मनामिह १९

माहेश्वरी शक्तिः सर्वानुग्राहिका शिवा धर्मानुवर्तनादेव पाश इत्युपचर्यत इति केचित्तु बिंदोरपि
महामायात्मनः परस्य शक्त्यपेक्षया पाशत्वेपि तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतुत्वेनापरमुक्ति
त्वादत्र पाशत्वेनानुपादानमित्यपि वदंति ततः शुद्धाध्ववासिनां महामायारोधशक्त्यात्मकमेव
पाशद्वयं विद्यते परंतु तन्मायेयपाशादिवन्न मोहकमपि तु बोधकमेवेति ज्ञेयं ननु नादाख्य

एकोऽप्यनेकशक्तिर्दृक्क्रियाच्छादनको मलः तुषकंचुकवद्देहनिमित्तं चात्मनामिह ॥१५॥

श्रीः
मंत्र
रत्न
९

त्परं बीजं सर्वं भूतेषु स्थितमिति श्रुतेः सकलस्यापि बिंदुकार्ययोगः सत्यं सर्वज्ञत्वाद्यविनाभूतेन
बैंदवशरीरादिनास्य योगो नास्तीत्येवमुक्तं १४ एवं च शिवशक्तेः पाशाधिष्ठातृत्वेनात्मतिरोधापि
कत्वादुपचारेण पाशत्वमित्युक्तं इदानीमेतेषां लक्षणानि क्रमेणोच्यते तत्र मलस्यानादित्वात्
पुंसः ज्ञानक्रियावारकत्वात्तल्लक्षणमाह एक इति एक एव मलः जडत्वे सति नित्यत्वात् जडा
नामप्यनेकत्वे सति घटादिवदनित्यत्वं स्यात् यद्येवं मलस्यैकत्वादेव मोक्षार्थं तस्य निरोधे सर्व
मोक्षप्रसंगः अत आह अनेकशक्तिः अनेकावरणानेकशक्तियुक्तः ततः एकस्याः परिपाकेन
तिरोधाने तदानस्यैव मोक्षः दृक्क्रियाच्छादनकः ज्ञानशक्तिक्रियाशक्त्योराच्छादकः तुषकंचुकव
त् आत्मनो देहनिमित्तं यथा तुषकंचुक[illegible]योगेनैव शाल्यादेः अंकुरोत्पत्तौ निमित्तं एवमात्म
नां मलयोगः शारीराद्युत्पत्तौ निमित्तं भवति १५ एवं मलपाशमुक्त्वा द्वितीयं कर्माख्यं पाशमाह
धर्माधर्माविति कर्म द्विविधं धर्मात्मकं अधर्मात्मकं च विचित्रसाधनभेदाद्विचित्रफलभोगाद्दर्शनाच्च

राम
९

श्री

कर्मणः प्रवाहनित्यत्वं अतएव बीजांकुरन्यायेन कर्मशरीरसंतानस्याप्यनादित्वेन स्थितेः
१६ इत्येनाविति इत्येतौ प्रथमौ पाशावुक्तौ एतदनंतरं मायेयादिपाशत्रयं अधादिक्रमभे
देन उच्यते संप्रदायानुसारतः शास्त्ररीत्या इत्यर्थः १७ इत्येतौ मलकर्मजौ पाशावुक्त्वा
इदानीं बिंद्वादितत्वगणं सृष्टिक्रमेण वर्णयिष्यन् आदौ जगदेकबीजं परमशिवं प्रस्तौति ४

धर्माधर्मात्मकं कर्म विचित्रफलभोगदं प्रवाहनित्यं तद्बीजांकुरन्यायेन संस्थितं १६ इत्येतौ
प्रथमौन्वाथ मयिपादिक्रमोच्यते अधादिक्रमभेदेन संप्रदायानुसारतः १७

सच्चिदानंदेति सत् चित् आनंदात्मको विभवो स्वरूपं यस्य अतएव परमात्मा सनातनः नित्यः प
तिः सर्वेषां विज्ञानाकलप्रलयाकलसकलानां पशूनां विद्याविद्येश्वरादीनां पतिः एकः अद्वि
तीयः अथैक एव शिवः जगत्कर्तासर्वानुग्राहकश्च न तस्यैवानादित्वमुक्तं उक्तं च शिवो हि परमो
ह्येक इति श्रुतिरप्याह एक एव रुद्रो न द्वितीय इति तत्वनैकेश्वरत्वेन जगत्कार्यसिद्धेः रथादीना

श्रीः
मंत्र
रत्ना
१०

10

मप्यनेककर्तृकारणमेकेच्छानुवर्तनंविनानुपपन्नेः उक्तंच बहवोयत्रनेतारः सर्वेपंडितमा
निनः सर्वेमहत्त्वमिच्छंतितद्वृंदमवसीदति एतेनप्रवाहेश्वरवादिनः प्रत्युक्ताः ऐश्वर्यस्यस्व
रूपव्याप्तिलाभात्मकत्वेनविनाशासंभवात् एवंभूतस्येश्वरस्यसद्भावेकिंप्रमाणमतआह ।
वीजंजगत्कर्तृत्वसमभिप्रायः सन्निवेशादिमत्वेनजगतःकार्यत्वंबुद्ध्वानस्यनिमित्तकारण

सच्चिदानंदविभवःपरमात्मासनातनः पतिर्जयतिसर्वेषामेकोबीजंविभुःपरः १८

मीश्वराख्यंकार्यत्वेनहेतुनानुमीयते उक्तंच विवादाध्यासितंविश्वंविश्वविद्कर्तृपूर्वकंकार्य
त्वादावयोःसिद्धंकार्यंकुंभादिकंयथेति श्रीमन्मतंगतंत्रेपि निमित्तकारणंत्वीशइत्युक्तंवि
स्तरेणविभुःव्यापकःपरःउत्कृष्टः जयतिसर्वोत्कर्षेणवर्तते १८ एवंशिवस्वरूपंसंस्तुत्य
तद्धर्मस्वरूपस्यावस्थास्तुतिव्याजेनदर्शयति १ नजायतेनउदयतिउत्पत्तिनाशशून्यत्वमि राम
त्यर्थः तद्धर्मत्वात् नहिनित्यस्यानित्यधर्मयोगः धर्मधर्मिणोव्यतिरेकेनधर्मिणोनित्यत्वप्र १०

संगात् दृक्क्रियारूपं स्वभावं यद्येवं चैतन्यं दृक्क्रियारूपं तदस्ति तर्हि आत्मसामर्थ्येनैव पशोः को
विशेषः अत आह निवृत्तिं च प्रयच्छति अस्य पशुसामर्थ्योदयविशेषः यदिदं केनापि न उच्यते न
त्वन्येन पाशविमोचनेन प्रकटीक्रियते तन्मोचयतीत्यर्थः । कितदिति ज्ञानक्रियास्वभावं शा
म्भवं तेजः वर्तते चिद्धर्मत्वादिदमपि चिदात्मकमित्यर्थः १९ अनेन रक्षाचरणेन मस्करोति ।

न नश्यति न चोदेति निवृत्तिं च प्रयच्छति वर्तते दृक्क्रियारूपं तत्तेजः शाम्भवं परं १९

शक्त्या यया हरोऽनन्तो भक्तो पशुगणस्य हि तच्छक्तिमाद्यामेकां तां चिद्रूपां व्यापिकां भजे २०

इदानीमधिकारावस्थायां तद्धर्मत्वेन शिवस्य शक्तिरेव करणमित्याह शक्त्येति यया शक्त्या हरः
पाशात् पशुभ्यो हरति तान् मोक्षार्थं वा हरतीति हरः यदुक्तं हरति पशुभ्यः पाशान् पुंसो प्युर्ध्व
पदं तनस्तु हरति यया शक्त्या अयमर्थः शक्त्यात्मना करणेन मलावृतसामर्थ्यत्वात् तत्वभोग
मोक्षार्थं स्वयमसमर्थानां पशूनां भोगमोक्षसिद्धये पञ्चविधकृत्यकरणे शक्तः समर्थो भवति ।
ननु देहेन्द्रियादिकरणान्तरेण ननु देहेन्द्रियरहितस्य कर्तृत्वं न दृश्यते तदुच्यते तद्रहितस्या

यात्मनः शान्तिमात्रादेव स्वदेहसंपादादौ सामर्थ्यमिति । शिवः शक्त्या युक्तो यदि भवति शक्तः प्र
भवितुमित्याचार्याः तस्माच्छिवस्य निर्मलत्वेन परमार्थतो वैंदवादि देहायोगाच्छक्तिरेव देह
कार्यं कुर्वाणा उपचारेण मूर्तिरुच्यते ननु पंचवक्त्रस्त्रिपंचनयन इत्यादिना शिवस्यापि शरीरभे
दः श्रूयते सत्यं सोपि ध्यानार्थमेव पंचवक्त्राद्याकारः श्रूयते निराकारे ध्यानपूजाद्ययोगात् न
तु मुख्यतः तस्य देहयोगः यदाहुः आकारवांस्त्वनियमादुपास्यो न वस्त्वनाकारमुपैति सि
द्धिमिति श्रीमत्पौष्करेपि साधकस्य लक्षार्थं तस्य रूपमिदं स्मृतमिति मृगेंद्रसंहितायामपि
पंचमंत्रात्मिका इति करणं च न शाक्त्यन्यदिति नच्छक्तिं शिवस्य शक्तिमायोत्पत्तिरहिता ष
धानां समवेतां अनेन परिग्रहाशक्तिस्वरूपबिंदुमायात्मकस्य शक्तिद्वयं बाह्यमप्यस्तीति सूच
यति उपादानं विना जगदुत्पत्त्ययोगात् अत्रोच्यते कर्ता शिवः करणं शक्तिः समवायी कार
णं बिंदुमाया च तदुक्तं कर्ता विना न कार्यं न तत्पादनकरणाभ्यामिति पुनः कथं तत्ता

एकाऽप्यद्वितीया अत्र च शिवः शिवशक्तिः एतद्विनयं बोधध्यानाय सिद्धये भोगमोक्षसिद्ध्यर्थं
ज्ञेयं तथाध्येयं तथा च उक्तं वस्तुतस्तु तयोः शक्तिशक्तिमतोः मूर्तिमूर्तिमत्वेनोक्तिर्ज्ञेया अन्यच्च
एकाभिन्नत्वेनेच्छादिभेदो वा मात्रादिभेदश्चाप्यस्यैव बोद्धव्यः कार्याद्युपाधिभेदेनोपचारात् न
तु परमार्थतः इति उक्तं च एकैवानेकतां याति शिवशक्तिरुपाधिभिरितिश्रुतेः चिद्रूपा इत्य
नेन कार्यभेदेऽपि मायादिवन्नास्याः परिणाम इति दर्शयति तस्यास्तु जडधर्मत्वात् व्याप्यैकां भज
भजामीत्यर्थः २० एवं शिवशक्त्योः सामरस्येनैकत्वं शक्तेः कारणत्वं च संसाध्य इदानीं पूर्वोद्दिष्टं
तमाचोज्जं भिन्नो बिंदुरिच्छाक्रियात्मा शिवाभिधः अशेषतत्वजातस्य कारणं विभुरव्ययः २१
शुद्धाशुद्धतत्वगणे वर्णयिष्यन् प्रथमं विद्यात्मकं शिवतत्वं तावल्लक्षयति तयेति तया अनादिशा
क्त्या बिंदुरुद्भिन्नः शिवाभिधः शिव इत्यभिधा यस्य शिवतत्वमित्यर्थः इच्छाक्रियात्मा इच्छाक्रिया एव आ
त्मा स्वभावो यस्य आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति कोशात् अयमर्थः तत्तद्भुवनेश्वराराध

श्रीः मंत्र रत्ना १२

नात् दीक्षया वा स्वकार्यभूतशुद्धाध्वभुवनपालानां ज्ञानक्रिये प्रकटयतीत्यर्थः तदुक्तं श्रीमन्मृ
गेन्द्रसंहितायां शान्त्यातीतं परं तत्त्वमविनाशव्ययात्मकं येनोन्मीलितसामर्थ्याः पशवश्शति उन्मी
लितं प्रकाशितं सामर्थ्यं येषां ते अत एव चास्य बोधकत्वं ननु मायापि कलादिद्वारेण ज्ञानक्रि
योन्मीलनकर्त्र्यस्ति न तस्याः मायोन्मीलितज्ञानादेः किंचिद्विषयकत्वाद्नात्मादावात्मादिभावना
हेतुत्वाच्च सा मोहिका इदं तु सर्वविषयज्ञानाद्युन्मीलकत्वात् शास्त्रशब्दोत्पादनद्वारेण शिवा
दिशुद्धस्वभावबोधकत्वाच्च बोधकमित्यविरोधः यद्वा ज्ञानक्रियाख्यं स्वबंधनं आत्मनो अभिव्य
नक्तीति ज्ञानक्रियास्वभावं अयमर्थः आत्मा स्वभावो यस्येति न च प्रश्लेषाज्जडरूपतया व्याख्येयं
ननु ज्ञानात्मकतया उपादानत्वेन मृत्पिण्डादिवदचेतनत्वाच्चेतनत्वे चोपादानत्वायोगात् तदुक्तं श्री
मत्पराख्ये निमित्तमीश्वरस्तेषामुपादानं सबिंदुराडिति अन्यत्रापि सा च कुण्डलिनी शंभोः शक्तिः राम
शुद्धजडात्मिका इति अत एव अशेषतत्त्वजातस्य कारणं अखिलस्य शुद्धरूपस्य तत्त्वजातस्य का १२

रणमुपादानं तत्वशुद्धतत्वस्यापि तस्य तु मायोपादानमित्युक्तत्वात् अस्य शुद्धत्वेनाशुद्धका
रणत्वायोगात् विभुर्व्यापकः समस्तशुद्धाशुद्धात्मनो जगतः निजपरिणतिरूपाभिर्निवृत्त्या
दिभिः कलाभिः विश्वं व्याप्नोतीत्ययमर्थः उक्तंच कलावृत्त्यानि तत्वानि तत्वस्थो भुवनव्रज इ
ति अव्ययं नाशशून्यं नित्यं चेति तत्वयंश्लोकः परमशिवविषयतया तच्छक्तिविषयतया वा व्या
ख्येयः शिवादिपृथिव्यंततत्वलक्षणप्रस्तावे तत्वातीतयोस्तयोरनाप्रस्तुतत्वात् तयोः शि
वतत्वरूपत्वेन शुद्धाध्वोपादानत्वाभ्युपगमे परिणामित्वादचेतनत्वादिदोषप्रसंगात् ननु आ
त्मैव जगदुपादानमिति वेदान्तविदस्तदयुक्तं तस्योपादानत्वेन तत्वादिवज्जडत्वप्रसंगाच्चेतना
चेतनोपादानत्वस्यापि तद्रूपत्वेन साक्षात्तया कार्यत्वप्रसंगाच्च तदानद्रूपिणो भावास्तदनद्रूप
हेतुजा इति एतच्च दूषणं पाञ्चरात्राभ्युपगतया नारायणव्याप्त्या प्रकृतेरपि ज्ञेयं न्यायस्य स
मानत्वात् उक्तंच नाचशक्तिरुपादानं चिद्रूपत्वाद्यथा शिवः परिणामो चितः प्रोक्तो चेतनस्य

श्रीः मंत्र रत्ना २२

13

नयुज्यते इत्यलं विस्तरेणेति शिवतत्वसिद्धिः २१ अत एवाह अस्मिन्निति इच्छाद्याः शिवशक्तयः
तस्मिन् बिन्द्वात्मके उपादाने प्रथमं निलीय तदधिष्ठानेन स्वकमनुग्राह्यानुग्राहलक्षणं [illegible] कृ
त्यं सृष्ट्यादिकं च कुर्वंति अतस्तदस्मापि परं परया सर्वानुग्रहसाधनत्वात्सर्वानुग्राहकं विदुः ज्ञेयं
ननु सर्वानुग्रहशक्त्यधिष्ठानस्वस्वविषयं संप्राप्य निरपेक्षेण स्वातंत्र्यात् अचेतनस्य चेतनाधिष्ठा

अस्मिन्निलीय निखिला इच्छाद्याः शक्तयः स्वकं कृत्यं कुर्वंति तेनेदं सर्वानुग्राहकं विदुः २२
चिज्जडानुग्रहार्थाय यस्य विश्वं सिसृक्षतः आद्योऽभिषोस्य नादात्मा शांत्यादि भुवनात्मकः २३
तच्छक्तितत्वमाचार्याः प्राहुः सावयवं पर

नं विना कार्योत्पादनायोगात् २२ इत्थं शिवतत्वं प्रसाध्य तत्कार्यभूतं शक्तितत्वमाह चिज्जडानुग्र राम
हार्थायेति चितां चिदात्मनां पशूनां अनुग्रहो मोक्षः तदर्थं तेषां मलपाकाय कर्मभोगार्थं च जडानां २२
जीवानां

पाशानामनुग्रहः सृष्ट्यादौ स्वस्वव्यापारसामर्थ्योत्पादनेन च तदर्थं तद्विषये विश्वं सिसृक्षतः यस्य
परमेश्वरस्य यः अनुग्रहः तद्धेतोः प्रथमोपादानत्वात्साधनरूपस्यास्य बिन्दोर्य आद्योन्मेषः प्रथमप
रिणामः शान्त्यादिभुवनात्मको नादात्मकश्च तत्र शक्तितत्त्वमाचार्याः प्राहुरिति शक्तितत्त्वसिद्धिः
अत्र चानुग्रहे साध्ये आद्योपादानत्वाद्धेतुः साधनत्वेनोक्तः सावयवं न च तच्छक्तितत्त्वं बिन्द्वादिवन्नि
रवयवं किन्तु सावयवं यदुक्तं तच्छक्तितत्त्वमभिहितमविभागमापन्नमस्यैवेति २३ एवं शक्तितत्त्वं
प्रतिसाध्य सदाशिवतत्त्वं वर्णयति ततो ज्ञानक्रियाशक्त्योस्तस्या उत्कर्षापकर्षयोः अभावेन सा

ततो ज्ञानक्रियाशक्त्योः तयोरुत्कर्षापकर्षयोः प्रसरस्याप्यभावेन तत्त्वं वै तत्सदाशिवं २४ इच्
शक्तिर्यत्र न्यग्भूता क्रियाशक्तिर्विशिष्यते ईश्वराख्यं तु तत्तत्त्वं प्रोक्तं सर्वार्थकर्तृकं २५ यत्र क्रि
या च न्यग्भूता ज्ञानं चोद्रेकमश्नुते ततः त्वे चैव विद्याख्यं ज्ञानरूपं ज्ञानरूपं प्रकाशकं २६

मेनवः प्रसरः अत्रायमर्थः सिसृक्षत्वेन प्रागुक्तस्य शिवस्य ज्ञानशक्तिक्रियाशक्त्योः साम्येनाधिष्ठानात्
तस्यैवोपादानतयोक्तस्य बिन्दोर्यो द्वितीयः परिणामः शक्तितत्त्वव्यवधानेन प्रागुक्तस्य जायते ।

तत्सदाशिवाख्यं तत्वं २४ सदाशिवतत्वानंतरं ईश्वरतत्वमाह यत्र यस्मिन् ज्ञानशक्तिन्यू-
नाभवति ज्ञानशक्तेरपकर्षो भवति क्रियाख्याशक्तिर्विशिष्यते क्रियाशक्तेर्विशेषो भवति तत् ई-
श्वराख्यं प्रथमर्थः जगत्कर्तृत्वाधिष्ठानेन क्रियाशक्तेर्योपरबाहुल्यं यत्र तत्सदाशिवाख्यतत्वा-
धस्तनं ईश्वराख्यं तत्वं तस्य च सर्वाधिकर्तृत्वं क्रियाशक्त्यधिष्ठितत्वात् सर्वकर्तृणामनंतादी-
नाम् चैवांतर्भावस्य वक्ष्यमाणत्वात् तेषां चकर्तृशक्तिगुणोह्लहेतुत्वाच्च तथा ज्ञानशक्तिन्यूनभ-
वतीतीश्वरसिद्धिः २५ विद्यातत्वसिद्धिमाह यत्र त्वीश्वरतत्वाधस्तने बिंदुपरिणामरूपे क्रि-
याशक्तिन्यूना भवति ज्ञानशक्तेस्तु समन्वकोटिमहामंत्राधिष्ठातृत्वेनोद्रेको भवति तत्त-
त्वमस्ति तज्ज्ञानरूपत्वात् सर्वज्ञत्वप्रकाशनहेतुत्वात् प्रकाशकं तद्विद्यातत्वमिति विद्या-
तत्वसिद्धिः २६ इत्थं शुद्धतत्वान्यभिधाय तेष्वेव तत्वानां गणामंतर्भावमाह नादेति यत्र यस्मि-
न् हि बिंदोः शिवतत्वेन तत्कार्यस्य सूक्ष्मनादस्य शक्तितत्वांतर्भावेन चोक्तत्वात् सकलो बिंदुः प्र-
त्वेर बिंद्वात्मको नादस्य स्थूलध्वनिरूपो तोद्धा सदाशिवतत्वात ईतोज्ञेयो विद्येशानामनंतादीनां

वर्गेश्वराख्येन तत्त्वेन भावः मंत्राः विद्याभिधं विद्याख्येन तत्त्वमाश्रिताः सप्तकोटिसंख्यानानां मं
त्राणां वाचकशब्दानां च व्योमव्याप्यादीनां विद्यादीनां च विद्यातत्त्वेन भावः कामिकाद्यष्टाविं
शतितंत्राणामपि विद्यातत्त्वेन भावः एवं इमानि पंचतत्त्वानि शुद्धाध्वरूपकानि बुधा आचार्याः
नादो बिंदुश्च सकलः सदाख्यं तत्त्वमाश्रितौ विद्येशाः पुनरैशं तु मंत्राः विद्याभिधं पुनः २७ इ
मानि चैव तत्त्वानि शुद्धाध्वेति जगुर्बुधाः पंचानां कालरहित्यात् क्रमो नास्तीति निश्चितं २८
व्यापारवशतो ह्येषां विहिता खलु कल्पना साक्षान्निमित्तमीशोऽत्र ह्युपादानं स बिंदुराट् २९
जगुः एवमेषां स्वरूपमुक्त्वा पंचानामप्यभेदं प्रतिपादयति पंचानामिति पंचानामेषां क्रमोऽक्रमो
भेदो नास्तीति [illegible] कालरहितत्वात् एषां व्यापारवशात् कल्पना विहिता ननु शिवस्यापि
शिवसदाशिवादिभेदाः शास्त्रेषु विश्रूयंते किं यथार्था वा अयथार्था वेत्यत आह तत्त्वं वस्तुत एकं
तु शिवाख्यं चित्रशक्तिकं तत्त्वमिति शिवाख्यं अधिष्ठातृरूपं तत्त्वं वस्तुतः एकमेव परमार्थतः तस्य

श्रीः मंत्र रत्ना १५ कर्तृत्वेन चैतन्याव्यभिचारात् चेतनस्य च विकारित्वाभावात् इत्युक्तं तत्त्वविविक्तशक्तिशान्तस्वचितं शक्ते
र्वैयकार्यानन्त्यादौपाधिकमानन्त्यमिति प्रतीवामा यौपाधिकानन्तभेदभिन्नतया शक्त्या अयमर्थः शि
वस्य शक्तिरेकैवापरं तु सा यदा कार्योन्मुखी तदा क्रियाशक्तिरिति व्यवह्रियते यदा पुनः साज्ञानोन्मुखी
भवति तदा सा ज्ञानशक्तिरुच्यते तत्रापि उपाधिवशात् तत्कार्यभेदेनानेकरूपा सा भवति सा चैव पर
मात्मनि समवायसंबंधेन विद्यमाना चिच्छक्तिः समवेता इत्यर्थः ततस्त्वात्मस्य शक्तिव्यापारभेदादुपचारे
तत्त्ववस्तुन एकं तु शिवाख्यं चिच्छक्तिकं शक्तेर्व्याप्तृत्तिभेदात् तु तस्यैवाभेदकल्पना २० चिद्रूपानुग्र
हाय यत्कृत्वा रूपाणि वेधसः अनादिमलरुद्धानां कुरुते तु ग्रहे विभो २१ भुक्तिं मुक्तिं च जीवानां
स्वव्यापारे समर्थतां विधत्ते जडवर्गस्य सर्वानुग्राहकः शिवः २२
ण सदाशिवादिभेदः काल्पनिक एव न तु परमार्थतः अधिष्ठेयस्य तु बिंदोः शिवतत्त्वाद्यवस्थाभेदः सिद्ध राम
एवेत्युक्तः उक्तं च किंतु यः शिवभेदोस्मिन् स तत्राख्ये शान्तिभेदवत् कृत्यभेदोपचारेण तद्भेदस्थानभे १५
दतः इत्यादि तथा लयादिभेदः शाक्तो यदुपायो शिवस्य तु सर्विंदुरिति मंतव्यः सैव कुंडलिनी मता
२०

15

अतएव सदाशिवाद्याकारभेदोऽस्य ध्यानार्थमेव न पारमार्थिकः श्रीमन्मृगेन्द्रसंहितायामप्युक्तं व
पुषो विद्यमानत्वाद्यद्यत्कृत्यं करोति सः तत्तत्तया स्यात्तत्काले वपुषानुकृतेनैव पुरिति एतदेवाह
चिज्जडेति शिवः चितां पशूनां अचितां पृथिव्यादिजडानां अनुग्रहार्थमेवैतानि रूपाणि कृत्वा स
दाशिवादिध्येयाकाराण्यधितिष्ठति अनादिमलरुद्धानां अनादिमलरुद्धशक्तीनां चितां अचितां च
शिवसामान्यरूपो हि मोक्षस्तस्य चिदनुग्रहः सोऽनादित्वात्कर्मणो हि न तद्भोगं विना भवेत् २२
तेनानुग्राहकः शम्भुर्जन्तोर्भोगापवर्गयोः कृत्वा तनुकरणभुवनोत्पत्तिमञ्जसा २४
अनुग्रहं करोतीत्यर्थः २२ पुनस्तदेव चिदचिद्विषयमनुग्रहं दर्शयति भुक्तिमुक्तिमिति अनादिमल
वा रुद्धानां जीवानां भुक्तिः सुखदुःखसंवेदनात्मिका मोक्षस्त्वनुग्रहः दुःखनिवृत्तिहेतुत्वात् जडवर्गस्य
पृथिव्यादेः स्व... व्यापारेषु धारकत्वचूर्णादिपिण्डीकरणत्वदाहकत्वैकीकरणत्वावकाशत्वेषु स
मर्थेनां सामर्थ्यं विधत्ते सर्वानुग्राहकः सर्वानुग्राहकत्वात् २२ चिदनुग्रहात्मकं मोक्षरूपमेवा
ह शिवसामान्यरूपो हीति शिवसमानता मोक्षः पाशनिवर्तनेन सर्वार्थदृक्क्रियात्मकशिवतत्त्वव्या

श्रीः मंत्र रत्ना १६

16

ज्ञया वच्छिवसाम्यरूपस्य मोक्षस्यैवानुग्रहत्वं स च कर्मणामनादित्वात्तद्भोगं विना न भवति भोगस्तु
कृतकर्मणो यतो नास्ति कल्पकोटिशतैरपि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभं अन्यच्च नाभुक्तं क्षी
यते कर्म कल्पकोटिशतैरपि इति न्यायेन कर्मक्षयहेतुतया परम्परानुग्रहहेतुत्वमित्यनुग्रहायोक्त
मित्यविरोधः २४ एवं पाशानुग्रहो विभागभोजनद्वारा पश्चादनुग्रहार्थ एवेत्याह तेनेति तेनानु

तेनानुग्राहकः शंभुः तन्तुत्वैः प्रभुरव्ययः कुरुते सूक्ष्मकरणं भुवनोत्पत्तिमंजसा २५ कर्तुपादा
नकरणैर्विना कार्यं न दृश्यते शक्तयः करणं चास्य मायोपादानमिष्यते २६ नित्यैका च शिवा भक्त्या
ह्यनादिनिधना सती साधारणी नराणां च भुवनानां च कारणं २७

ग्राहकः शिवः तन्तुत्वैः सूक्ष्मकरणं भुवनोत्पत्तिः सूक्ष्मकरणशब्देनासाधारणी तनुः सृष्टिरुच्यते भुवन
शब्देन च साधारणी भुवनाद्यात्मिका असाधारणी साधारणी च सृष्टिमनन्तादिद्वारेण करोतीत्यर्थः २५
न देवं प्रतिपादयन्ति कर्तुपादानकरणैर्विना कार्यं निष्पत्तिर्न भवतीत्यर्थः शिवस्यापि तत्तु करणादेर
श्रुद्धाधनुपादानं किमुपादानं किं वा करणमिति प्रश्ने [illegible] पस्तत्राह शक्तय इत्यादि राम १६

नैयायिकैस्तु ष्याऽऽदे

भेदभिन्नाशक्तय एव प्रसृतास्ताधर्म्यापिनस्य कारणं उपादानं मायाख्यमुच्यते । अत एवं परमाणोरपि कारणत्व
मित्युक्तं तद्ध्येयं ॥ इदं मायास्वरूपमाह नित्याद्याद्येतरं हिता सृष्टिसंहारप्रबंधस्य नित्यत्वेनावस्था
नान्नस्याप्याद्यंतविरहो यतः परमकारणत्वान्न स्यापि उपादानाभ्युपगमेऽनवस्थाप्रसंगाच्च एकावि
जातीयसामर्थ्यवती परमकारणत्वान्न श्चावैतन्मे सत्यनेकत्वान्नघटादिवत् कारणांतरं मृग्यं अनवस्था
स्या नवप्रसंगात् शिवासन्नात्र समवेतोऽपादानत्वेन बिंदुवत्परिग्रहोऽशात्वान् साधारणीनतरणाद्यवि
लभुवनानांसाधारणकारणमित्युपलक्षणं देहादेरपि प्रलयकालेऽवबुद्धेरपि तच्चलयात् ॥ स्वभा
स्वभावान्मोहजननी त्वद्विना जनकर्मभिः विश्वीसूत्त्मा परामाया विकृतेः परतस्तु सा ॥ इदं कर्मण
वेद्यविधेया माया विद्याप्य शक्तिभिः विधत्ते जीवभोगार्थं वपूंषि करणानि च ४० स्वज
न्यादौ कालतत्वं नानाशक्तिमयी च सा भाविभवद्भूतमिदं जगत् कलयति त्वयं ४१
वान्मोहजननी मोहिकाग्निविलापिकर्मभिः त्वद्विना कर्माणि कृष्यादिवत् प्रकृतिसंस्कारत्वान्नबुद्धि
धर्मत्वेनेष्यतेनात्मधर्मत्वेन तस्य विकारित्वप्रसंगात् साच विश्वीसृत्कार्यव्यापिका सूक्ष्मा च मूर्तिए
वंभूतामायापूर्वोर्येवर्णिता इत्यर्थः ॥ इदं ननस्त्वच्छिवो ह्यात्मनांकर्माणि प्रलयेपक्वानि बुध्वा तज्ज्ञोगार्थं

चा

श्रीः
मंत्र
रत्ना
१७

17

स्वशक्त्यधिष्ठिताभिरनंतशक्तिभिर्मायां विक्षोभ्य प्रसवाभिमुखीकृत्य भुवनं भोगार्थं वपूंषि शरीराणि
करणानि च साधनं एतदुक्तं भवति विक्षोभ्य च तदधिष्ठानेनैव प्रति पुरुषं भिन्नानि भिन्नानि वपूंषि स्थू-
लशरीराणि कारणोपलक्षितानि सूक्ष्माणि वपूंषि च शब्देन साधारणादि भुवनादीनि सृजतीत्यर्थः
तदुक्तं श्रीमदघोरवामादिशक्तिभिर्युक्तः शिवेच्छाविधिचोदितविद्याराजाधिराजेशो मायां विक्षोभ्य
मंत्रराट् कलामुत्पादयामासेति इदानीं कलादिपृथिव्यंतानां त्रिंशत्तत्त्वानां सूक्ष्मदेहोपकारिणां द-
र्शयितुं तेषां सृष्टिक्रममाह ५२ यामहाप्रलये कार्याणां शक्तिरूपेण तत्रावस्थानात् नानाशक्ति-
मयी शक्तिसमूहात्मिका सा माया तथानंतेनाभिन्ना आदौ कालतत्त्वं जनयति एषः कालश्चाशु बिंदोः परि-
णामः क्षीरदधिन्यायेन न सर्वात्मकरूपेण तु छत्रकीटन्यायेनैकदेशेन मंतव्यः ननु श्रीमन्मतंगतन्त्रादौ क-
लाविद्यारागेभ्योनंतरमस्य क्रियापठ्यते तत्कलाविद्यारागयुक्तस्यैव पुंसो नैककालेन तत्र प्रवृत्ति-
क्रमोदर्शिनः अत्र तु सृष्टिक्रम इत्यविरोधः ननु दिक्कालयोरीश्वरानतिरिक्तत्वान्नित्यत्वात् एव कालो नै- राम
यायिकादिभिर्नित्योभ्युपगतः तदयुक्तं तदेवाह भाविभवद्भूतमिदं तत्रभूतभविष्यादिरूपेण त्रिविधत्वे १७

आचैतन्ये सत्यनेकत्वेन प्रागभावात्यंताभावप्रतियोगित्वादस्यानित्यत्वं सिद्धमिति भावः केन कार्येणा
स्य सिद्धिरित्याह जगत् कलयति चिरक्षिप्रादिप्रतीत्योपाधिद्वारेणाक्षिपतीत्यर्थः उक्तं च कालोधि
पाय्यमजस्य तु इति कालतत्त्वसिद्धिः ४० नियतितत्त्वमाह कालतत्त्वानंतरं मायातः मायात्मकाशात्
नियमनात्मिका नियतिशक्तिर्भवति सा मायातोत्पन्ना एषा सर्वं नियमयति तेनेयं नियतिशक्तिरुक्ता अ
यमभिप्रायः नियत्यभावे त्योपार्जितान्यपि कर्माण्यन्येन भुंजीरन् राजनियमाभावे कृष्यादिफलवत् अ

स्तेस्यानंतरं मायाशक्तिं नियमनात्मिकां सर्वं नियमयत्येषा तेनेयं नियतिस्मृता ४० अनंतरं च
सा मायानित्या विश्वविमोहिनी सनादिनिधना तत्त्वं कलाख्यं जनयत्यपि ४१ एकेनस्तुनणांशेन
कलयित्वा मलेनेनः कर्तृशक्तिं व्यंजयति तेनेदं तु कलाभिधं ४२

न ह्यन्नियामकत्वेनेयं सिद्धा न च कर्मणो नियामकत्वं तस्य जननेन एव चरितार्थत्वात् कार्यांतरहेतुत्वे प्रमा
णाभावात् अनेककल्पनागौरवप्रसंगाच्च न च शिवशक्तिर्नियामिकास्त्विति वाच्यं तस्याः स्वतंत्रत्वात् अव
धानेनैव भोगविषये कार्यकारणादन्यथा सर्वतत्त्वाभावप्रसंगाच्चेति नियतितत्त्वसिद्धिः ४१ नियतित
त्त्वानंतरं कलातत्त्वमाह अनंतरमिति सा मायानियतितत्त्वानंतरं कलाभिधं तत्त्वं जनयति ४२ ॥

येनेति येन तत्त्वेन मलावृतानां जीवानां मलं एकदेशो कलयित्वा द्विस्थानतः कर्तृशक्तिं शक्तेरेकत्वात् ज्ञा-
नशक्तिं क्रियाशक्तिं किंचित् व्यंजयति प्रकटयति तेन कार्यं न कलासिद्धिरित्यर्थः ननु सा त्वे निर्मल
एवात्माभ्युपगतस्तद्युक्तः संसारावस्थायां तस्य पारतंत्र्यदर्शनात् तस्य चाहेतुकत्वे मुक्तस्यापि पारतंत्र्य-
प्रसंगात् ज्ञानक्रिययोर्बीजकापेक्षणाच्च युक्तमुच्यते पाशाभावे पारतंत्र्यं बद्धस्य किं निबंधनमित्याद्यलं
विस्तरेण ४३ कालेन नियत्या चोपसर्जनतामुपेतया या सा कलाभूतत्त्वपर्यंतं स्वव्यापारं विदधाति अथ
कालेन च नियत्योपसर्जनतामुपेतया व्यापारं विदधात्येषा भूपर्यंतं स्वकीयकं ४४ प्रदर्शनार्थं वै पुंसो विषया-
णां च सा पुनः प्रकाशरूपं विद्याख्यं तत्त्वं सूते कलैव हि ४५ विद्यावरणभित्त्वा ज्ञानशक्तेः स्वकर्मणा वि-
षयान् दर्शयत्येषा सात्मनो करणं ह्यतः ४६
मभिप्रायः कला हि भोक्तृस्वरूपोपकारकत्वेनांतरंगत्वात्प्रधानं कलादिभिन्नं बहिरंगत्वादप्रधानमिति
भाव इति कलातत्त्वसिद्धिः ४५ विद्यातत्त्वमाह प्रदर्शनार्थमिति सा कला पुरुषस्य विषयाणां प्रदर्शना-
र्थं प्रकाशरूपं विद्याख्यं तत्त्वं सूते यदुक्तं श्रीमत्तगौरवतंत्रे कलातत्त्वाद्रागविद्ये तत्त्वे संबभूवतुः अ- राम
त्रैवेति विषयप्रदर्शननिमित्तमेव प्रकटयति विद्येति विद्या आत्मनो ज्ञानशक्तेः स्वकर्मणा विषयान् १८
दर्शयति ननु कलैव मलविदारणेन ज्ञानमपि प्रकाशितं सत्यं अभिव्यक्तेः स्वरूपमपि कला

तत्त्वं करणं विना न विषयं ग्राहयितुं शक्तं अतश्चेयं विद्याव्यापारेण ज्ञानशक्तेर्विषयग्रहणात्मत्वलक्षणमाव
रणं अवरोधं व्यपोह्य विषयं प्रकाशयति ननु विषयग्रहणे बुद्ध्यादिकरणानि सन्तीति सत्यं अत एवेयमात्मनः प
रमं अन्तरंगकरणं तेषां बहिरंगत्वात् एतदुक्तं भवति अनेन यथा दीपिकया यातीत्यादि [illegible] विचित्रानेकका
रकसाध्येऽपि फले विद्यैव परमं करणमिति ४६ तदेवाह करोतीति सा विद्यान्तरं करणं येन करणेन महद
दादीन् प्रबोध्य अयमर्थः अशुद्धशक्तिः पुरुषः येन विद्याख्येन करणेन बुद्ध्यहंकारादिकरणग्रामं प्रबोध्य भो

करोति भोग्यं येनासौ करणेन परेणैव अशुद्धशक्तिः पुरुषः प्रबोध्य महदादिकान् ४७ भोग्यं हि भो
गं च पुनरन्तरं करणं तु सा भोग्यस्य भोग्यनिर्भासा चिच्छक्तिर्भोग उच्यते ४८

ग्यं निष्पादयतीत्यर्थः तस्मिंश्च भोग्ये पुनर्भोगं च करोति नहि विद्याख्यं करणं यस्तत्रैव भोग्यं जानातीति आत्म
नः अतिसंनिकृष्टत्वादन्तरमित्युच्यते ४७ किं पुनरत्र भोग्यं किं वा भोगमित्यत आह अस्य भोक्तुः अनुसंधातुः
पुरुषस्य भोगे बुद्ध्यादिसुखादिव्यवसायरूपे अहं सुख्यहं दुःखीति भोग्यनिर्भासा भोग्योपरक्ता चिच्छक्तिः
संविद्रूपः संभोगो मन्तव्यः उक्तं च श्रीमत्स्वायंभुवे भोगोऽस्य वेदनारूपः सुखदुःखादिलक्षण इति तस्या
ध्यवसायस्य तिपत्तिभादिप्रत्ययभेदभिन्ना बुद्धिरपि यया वेद्यते सा तत्परं करणं ४८ किमस्य भोग्यमित्याह

श्रीः
मंत्र
स्त्रा
१९

19

सुखादिरूपेति विषयाकाराध्यवसितस्रक्चंदनादिविषयास्तवेङ्ःखमोहाध्यवसायरूपाबुद्धिरेव पुंसः
समासतः [redacted] भोग्यं तस्याएवसाक्षाद्भोग्यत्वात् विषयास्तु बाह्याः तत्साधनत्वेन परंपरया भोग्याइत्यने
तथाहि भोग्यंहिवस्तुविज्ञाधिष्ठितं बुद्धींद्रियद्वंद्वविद्ययाविषयत्वेनोपस्थापयति तच्चाहंकारदृष्ट्यात्मपराम
र्शपूर्विकयाबुद्ध्याध्यवसितमर्थं पुरुषोगृह्णाति यदाहुः बुद्ध्याध्यवसितमर्थं पुरुषश्चेतयतइति बुद्ध्यादीनां
संनिहितासंनिहितविषयोपस्थापकत्वेनोपयोगः ननुसंविज्जनकत्वेन अनस्ततउपस्थापितंविषयं बुध्यहंकारौ

सुखादिरूपंविषयाकाराबुद्धिःसमासतः भोग्यंभोक्तृश्चयेनैवविद्यात्वंकरणेनुनत् ४९ य
घर्कवत्प्रकाशाधीःकर्मत्वाच्चतथापिहि करणेनरसापेक्षाशक्ताग्राहयितुंवनं ५०

ङ्द्रियवृत्तिभेदैर्याविवेचयतिसाविद्येतिविद्यासिद्धिः ४९ ननुबुद्धेरेवप्रकाशरू[illegible]पत्वात्सूर्यादिवद्विषयान
पाध्यवसायेन प्रकाशयिष्यतिस्वात्मानमपि ग्राहयिष्यतितत्तुकिमन्येनविद्यात्वेनत्वत्वेनेत्यतआह
यद्यपिसूर्यवत्प्रकाशरूपाबुद्धिस्तथापियाघतापन्नास्वात्मानंकरणत्वेनग्राहयितुंनक्षमाग्राह्यत्वेन
[illegible]घटादिवत् बहिरंगत्वात् दृढचाचाक्रतं प्रकाशरूपाः सूर्यादयानकेवला
स्वात्मानंग्राहयंति किंतुचक्षुरादिकरणापेक्षाएव ततःसुखादिरूपापिबुद्धिर्नकेवलास्वात्मानंग्रा

राम
१९

इयत्यपि तु करणं न रसापेक्षैवेति तत्करणत्वेन विद्यासिद्धिः ८० ननु प्रकृतिकर्त्री पुरुषः पुष्करपला
शवन्निर्लेपः किंतु चेतन इत्यादिना प्रकृतिरेव बुद्ध्यात्मना परिणतेमान्मानं पुरुषस्य भोग्यत्वेन दर्शयति
[redacted] पुरुषस्य तु न कर्तृत्वं अपि तु द्रष्टृत्वमेव अतो कर्तृत्वात्तस्य न करणापेक्षेति पु
नरपि विद्यानर्थक्यं सत्यमाह करणादिभिः आदिग्रहणाद्विषयैश्च संबंधात् भोगाभिलाषेण नेत्राकर
णादीनां प्रयोक्तृत्वात् चेष्टाया विषयग्रहणात्मिकायाः क्रियाः फलेन सुखादिना योगाच्च पुरुषस्य क

संबंधात्करणाद्यैस्तद्भोगोन्मुक्तेन वरणात् चेष्टाफलयोगाच्च संसिद्धा कर्तृतास्य तु ८०
अकर्तृत्वाभ्युपगमे भोक्तृत्वाव्याहतत्वमस्य तु किंच प्रधानचरितं व्यर्थं सर्वं भवेत्ततः ८१
कर्तृत्वरहिते पुंसि करणाद्यप्रयोजके गस्यासंभवस्तस्मात्स एवात्र प्रवर्तकः ८२

तत्त्वसिद्धं इदं चात्राकूतं प्रकृतेरचेतनत्वान्न पुरुषं प्रतिपारमार्थ्येन प्रवृत्तिर्युक्ता पुरुषस्यैव तु चेतनत्वेन
करणादिप्रयोक्तृत्वं संभवति न तस्यैव कर्तृत्वे प्रकर्तुरिकरणादिसंबंधस्य निरर्थकत्वात् इति ननु
अचेतनस्यापि क्षीरस्य गवादेर्वत्सादिवृद्ध्यर्थं प्रवृत्तिर्दृष्टा यद्वत्संसारोच्छित्ति विवृद्धिनिमित्तं क्षीरस्य यथा प्र

वृत्तिरज्ञस्य पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति नन्वत्तीरस्यापि चेतनत्वं न गवादिप्रेरितस्यैव प्र
वृत्तिदर्शनात् प्रधानस्यापि स्वतः प्रवृत्तिरुपपद्यते अतः किंच ५१ पुनः प्रवर्त्तकत्वमेव प्रतिपादयति
यस्मात्कर्तृत्वरहिते कारणाद्यप्रयोजके पुंसि भोगो नष्टः ततो भोगस्यापि संवेदनरूपस्य क्रियात्वेन भोक्तृक
र्तृत्वानयगमात्तदभ्युपगमे सांख्यानां भवतां पुरुषे भोक्तृत्वकथनं नष्टो गार्थश्च चेतनस्य प्रधानस्य प्रवृत्ति

कारणादिप्रयोक्तृत्वं विषयैवास्य संमतं अनंतरं कलारागं सूतेऽभिष्वंगरूपकां ५३ येन भोग्या
यज्ञनिताभिष्वंगे पुरुषे पुनः क्रियाप्रवृत्तिर्भवति तेनेदं रागसंज्ञकं ५४ एभिः तत्त्वैश्च भोक्तृ
त्वदशायां कलितो यदा नीतस्तदायमात्मा तु लभते पुरुषाभिधां ५५

स्वकल्पमानानिरर्थकत्वात्तद्युक्तमित्यर्थः ५२ ततः करणादिप्रयोक्तृत्वाद्भोक्तृत्वाच्च पुंसः कर्तृत्वं सिद्धमेव
यदुक्तं प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः अप्रवृत्तः प्रवृत्तो वा स कर्ता नाम कारक इति तस्मात्कर्तृत्वक
र्तृत्वमपि पुंसः स्वरूपमस्तीति प्रतिपादितं ५३ इदानीं रागतत्त्वसिद्धिमाह अनंतरं विद्यातत्त्वानंतरं सा
कलारागतत्त्वं सूते उत्पादयति येन रागेण अस्मिन्पुरुषे जनिता अभिष्वंगे अभिलाषः कार्यत्वेनास्य घते

यः स्तु सरागः अभिलाषे भोग्यवस्त्वादानाय क्रियाप्रवृत्तिर्भवति सोऽत्र रागो ज्ञेयः अभिलाषात्मना कार्येण
रागतत्त्वसिद्धिः २४ ननु अवैराग्यलक्षणो बुद्धिधर्म एवाभिलाषहेतुरिति सांख्याः नइत्युक्तं वासनो
रूपस्याकार्यकरत्वात्तस्य अकार्यकरत्वेपि बुद्धेः सर्वदानेन वासनायोगेन पुंसो युगपद्बहुरूपज्ञानं तत्र
तिप्रतिनिवेशसप्रसंगाच्च ज्ञानरूपस्यापि भोग्यत्वान्नाभिलाषहेतुत्वं ननु गुणविषय एवाभिलाष
हेतुरस्तु तत्र विषयसन्निधानमात्रादेव सर्वस्य साभिलाषाप्रत्तेः वीतरागाभावप्रसंगात् तस्मा
द्वीतरागदर्शनान्यथानुपपत्याभिलाषोभ्युपगंतव्यः उक्तं च भोग्यविशेषे रागेण नहि किञ्चिद्वीतराग
स्यादिति न च कर्मैव रंजकं भविष्यतीति वाच्यः तस्य फलजनन एव चरितार्थत्वादनेकतत्त्वपरिकल्पना
भावप्रसंगाच्च ननु मायायाः स्वभाव एव मोहजनकत्वात् माययाद्वारेणापि ज्ञात्वात् क्रियाप्रवृ
त्तिर्भवतीति किमनेन रागेण न च कलितो विभक्तो यदा निर्मलो भवति यदायतो न मायायाः साक्षा
न्मोहकत्वं अपि कार्यद्वारेणेवेत्यदोषः इति रागतत्त्वसिद्धिः एभिस्तत्त्वे एभिः कलादिपंचतत्त्वैः रूप
द्बृंहितोऽणुभोक्तृत्वदशायां नीतः तदा पुरुषाभिधां प्रमत्वनिर्देशयाति न तु परमार्थतः २५ अव्य
क्तसिद्धिमाह कलैवेति पश्चात् रागतत्त्वानंतरं कलाएव अव्यक्तं प्रधानं तत्त्वमहत्तेऽभ्युत्पन्नं करोतीत्यर्थः

अस्य पुरुषस्य भोगार्थं यं च तन्मात्रा बुद्धिः अहंकार इति सूत्रग्रन्थयः तद्विधानस्य गुणसमूहस्य कार
णं यत् तदव्यक्तं अयमर्थः भोक्तृत्वं प्राप्तस्य पुंसो भोगार्थं भुज्यत एभिरिति भोगः भोगसाधनानि तु
गुणादीनि तत्त्वानि तन्निष्पत्त्यर्थं तत्कारणत्वेनाव्यक्तं तद्रागतत्त्वानन्तरं कलैव उत्पादयति ७६ गुण
त्रयाणां साम्यावस्था प्रकृतिरिति सांख्यास्तदयुक्तमिह गुणानामिति अत्रैवाव्यक्ते गुणानां लयः यथा

कलैव पश्चादव्यक्तं सृजते भोगाय चास्य तत् सूत्रग्रन्थिविधानस्य यत्तद्गौणस्य कारणं ७६
गुणानामविभागो यत्राधारे क्ष्मादिभागवत् आधारो यश्च यस्तेषां तदव्यक्तं च गीयते ७७

क्ष्मादिभागानां घटादिरूपाणां पृथिव्याद्यात्मक आधारे अवश्यमविभागो भवति तद्वत् सत्त्वादीनामपि गु
णानां कस्मिंश्चिदाधारे अवश्यमविभागो ज्ञेयः ततस्तस्याविभागस्य आधारभूतं यत्तत् अव्यक्तमित्यव न्त
क्तसिद्धिः यद्येवं तर्हि सांख्याभ्युपगतवत्त्रित्वमेवमस्तु तत्तत्प्रकृतेः प्रतिपुरुषभेदेन जडत्वे सत्य
नेकत्वात्कार्यत्वं सिद्धमिति तदुक्तं श्रीमन्मृगेन्द्रसंहितायां ततः प्राधानिकं तत्त्वं कलातत्त्वादजीज
नदिति ७७ गुणानामचैतन्ये सत्यनेकत्वाद्घटादिवत् कारणपूर्वकत्वात्तेषां अव्यक्तादेव सं राम
तिरित्याह सत्त्वं रजस्तम इति त्रय एव गुणाः तेषामव्यक्तादेव संभूतिरित्याह एव शब्दादिर्नक्रमः ते २१

गुणाः प्रख्याव्यापारनियमात्मकाः प्रकाशप्रवृत्तिनियमाः सत्वादीनां क्रमाद्व्यापाराइत्यर्थः एवंच स्व
स्वदेहद्वारेण समस्तमायाकार्येषु व्यापकत्वमस्ति प्रकाशादयश्च अन्यासां सप्रधानगुणवृत्तीनामुपलक्ष
णं तथाहि स्थैर्यधैर्यादयोपि सत्वस्य वृत्तयः क्रौर्यशौर्यादयोपि रजसः तमसस्तु अरतिमोहादयोपीति
ज्ञेयं तदुक्तं श्रीमन्मतंगतंत्रादौ एषांसाधर्म्यं विस्तरेण द्रष्टव्यं ४८ ततो गुणतत्वान्महत्तत्वमुत्पन्नमित्या
ह गुणतत्वसकाशात् बुद्धिर्जाता सापि पुंसां कर्मवशात्सत्वादिगुणवाहुल्येन सात्विक्यादिरूपा जा

त्रयएव गुणाह्येषामव्यक्तादेव संभवः सत्वं रजस्तमः प्रख्याव्यापारनियमात्मकाः ४८
गुणतो धीश्च विषयाध्यवसायस्वरूपिणी गुणतस्त्रिविधा प्रोक्ता सापि कर्मानुसारतः ४९

यतो गुणानां सर्वत्र व्यापारदर्शनात् विषयाध्यवसायात्मिका विषयबोधवृत्तिका सबोधो द्विविधः अध्यव
सायात्मकश्च अनध्यवसायात्मकश्च तयोर्नध्यवसायात्मकः सन्तु ग्राहकरूपेणैव भासमानो नित्य आत्मस्व
भावः यस्तु अध्यवसायरूपः सतु तत्तद्रूपेण अनित्यत्वेनावभासमानो नु पुंसः स्वभावः नित्यस्यानित्यस्व
भावत्वायोगात् अनित्योसौ अनुभूते नोयं स्वभावः साबुद्धिः अयं पठइ विषयाध्यवसायात्मना कार्येण बुद्धि

श्रीः
मेघ
रत्ना
२२

22

सिद्धा उक्तं च अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकं बालमूढादिविज्ञानसदृशं शुद्धवस्तुजं
ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमतेति एवं धर्माश्रयतया
पि बुद्धिसिद्धिः श्रूयते भावा बुद्धिगुणा धर्मज्ञानवैराग्यैश्वर्यलक्षणाः सात्त्विकत्वात् येनैते रागमुक्तस्त्यक्ततामसाः
इति अयमभिप्रायः कर्मणा धर्माधर्मात्मनोऽनुष्ठानरूपस्य तत्क्षणमेव नाशात् तज्जन्यो यः पूर्वोक्तः संस्का
रः कालान्तरफलश्रुत्यन्यथानुपपत्त्या कल्प्यते स च नात्मनि संभवत्यविकारित्वात् कर्मणो चक्षुष्यादी

महत्तत्त्वादहंकारो जातः संरंभलक्षितिमान् संभेदादस्य विषयः प्राप्नोति व्यवहार्यतां ६०
सत्त्वादिगुणभेदेन स पुनस्त्रिविधो भवेत् तैजसो राजसश्चैव तामसश्चेति मानसः ६१

वा आत्मसंस्कारत्वाद्दृष्टेरपि तु जडे एवायत्तत्वान्निःसंस्कारं कुर्वन्ति सा धर्माद्यष्टगुणा बुद्धिरिति बुद्धितत्त्व
सिद्धिः ५९ संरंभः लक्षणिको जीवः लक्षितिमान् इत्यर्थः विषयको ज्ञो जीवः व्यवहारदशां प्राप्नोति अहंकार
सिद्धिमाह महत्तत्त्वादिति संरंभो जीवनयोनिप्रयत्नात्मको हंकारकार्य एव यदुक्तं संरंभो हंकृतेर्वृ
त्तिरिति स च संरंभः ज्ञानशक्त्याश्रयभूतया बुद्ध्या बोधाध्यवसायवते क्रियाशक्त्याश्रयभूतया हंकृ

राम
२२

न्याभवति अयमेव प्राणादिरूपस्यांतरस्य वायोः प्रवृत्तिनिमित्तं यदाहुः प्रेरणाकर्षणे वायोः प्रयत्नेन
विनाकृत इति किंच ग्राह्यपरामर्शात्मनो बुद्धिकार्यात् प्रतिक्षणमनेकरूपादत्यन्तविलक्षणमेकरूपमा
हमिति ग्राहकपरामर्शस्य यत्कारणं सोऽहंकार इत्यहंकारसिद्धिः न चायं संरंभस्तत्त्वांतराणां कार्यं नेषां
स्वकार्यैरेव सिद्धेः अन्यतत्त्वानां संरंभात्मककार्यांतरहेतुत्वप्रमाणाभावादनेकतत्त्वपरिकल्पनाभाव
प्रसंगाच्च अस्य सतः पुरुषस्य संभेदादेव घटमहं जानामि पटमहं जानामीत्यादि व्यवहार्यतां प्राप्नोतीत्यर्थः

६० तत्तैजसतो ज्ञानेंद्रियाणि मनसा सह प्रकाशान्वयतस्तस्माद्बोधकानि भवंति हि ६२ राजसा
त्तु क्रियाहेतोस्तथा कर्मेंद्रियाणि तु तामसात्त्वेव जायंते तन्मात्रो भूतयोनयः ६३ इच्छारूपं च
संकल्पव्यापारं तत्र वै मनः द्विधाधिकारितश्चित्तं भोक्तृभोगोपपादकं ६४

सः अहंकारः सत्त्वादिगुणभेदेन त्रिधा भवति तदेवाह तैजसो सात्त्विकः राजसः तामसश्चेति सात्त्विकादीनां
अहंकारस्कंधानां तैजसादीनि क्रमान्नामानीत्यर्थः ६२ तत्र तेषु मध्येषु तैजसाहंकारस्कंधात् मनसा सह
ज्ञानेंद्रियाणि भवंति तानि तु प्रकाशान्वयतः सात्त्विकादुत्पन्ना भवंत्यतो बोधकानीत्यर्थः ६३ तथैव कर्मे
न्द्रियाणि तु क्रियाहेतुत्वाद्राजसाहंकारस्कंधाद्भवंति तामसाद्भूतयोनयः भूतानां कारणभूतास्तन्मात्रा जायंते

श्रीः
मंत्र
रत्ना
२३
93

एवं त्रिविधादहंकारादेषामुत्पत्तिः मनसा सहेत्यत्र चैत्रेण सह मैत्रश्चलत इत्यादिवत् इयमप्रधाने तृतीया
ज्ञेया ननु तत्र तैजसतो मनसः उत्पत्तिर्वैकारिकादुभयरूपाणीन्द्रियाणि जायन्ते इत्यन्यत्र व्याख्यातृणां अत्र तैज
सादेव ज्ञानेन्द्रियाणामुत्पत्तिरिति ग्रन्थान्तरविरोधात् उच्यते सत्त्वस्य प्रकाशालोकत्वेन बोधहेतुत्वं रजसश्च क्रि
याहेतुत्वं उक्तं च श्रीमन्मृगेन्द्रसंहितायां श्रोत्रत्वक्चक्षुर्घ्राणजिह्वाणां च मनसा सह प्रकाशान्वयतः स
त्त्वात्तैजसश्च स सात्त्विकः वाणीपाणिभगोपायुः पादौ चेति रजोद्भवाः कर्मान्वयाद्रजोद्भूतात् एतौ वैकारिको
त्रयः शब्दस्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः गुणा विशिष्टास्तन्मात्रास्तन्मात्रापदयोजिताः अतश्च ज्ञानेन्द्रियद्वा
रेण तैजसेनाहंकारेणात्मनो ज्ञानशक्तिरुन्मील्यते वैकारिकेनापि कर्मेन्द्रियद्वारेण क्रियाशक्तिरुन्मील्य
ते तस्य मलिनत्वात् तदपेक्षया एषां च सात्त्विकादिव्यवहारः सत्त्वादिगुणबाहुल्येन तत्क्रिमिश्रं परिणयत
इत्यादिना यावत्तत्त्वेकं जनकं भवति अहंकारो यत्तु बुद्धेर्जन्मतु द्रिश्च गुणतत्त्वादिति नन्वैशेषिकादिभिर्नि
यतविषयत्वाद्भौतिकानीन्द्रियाणीष्यन्ते तदयुक्तं चक्षुरादिना भूतान्तरगतस्य गुणस्य भूतान्तराणां कर्म राम
णां कर्मसामान्यादेश्च ग्रहणात् उक्तं च भोगकारिकासु भौतिकत्वाच्च नियमे कर्मसामान्ययोर्ग्रहः देवेभ्यो २३
बुद्ध्या तस्य समवाये च देहिनामिति यत्तत्रैवोक्तं आहंकारिकत्वाविशेषेपीति तेषां विषयनियतत्व

न५

भावभेदइतिचतदप्युत्पत्तिभेदादिक्षुविकाराणांगुडखंडशर्करादीनामिवभविष्यतीतिनकिंचिदे
तत् ६५ मनस्तत्त्वमाह संकल्पोऽवधानमेकाग्रतातेन व्यापारेणइच्छारूपाणिसिध्यन्तीत्यर्थः
इच्छारूपइच्छाद्यात्मिकं नच ज्ञानक्रियात्मकत्वात् बुद्ध्यहंकारकार्यात् ग्राह्यग्राहकपरामर्शात्म
नोभिन्न तयोः प्रत्यस्तैयरूपत्वादतोयस्यैतत् कार्यंतन्मनः तच्चमनः संकल्पेनांतरेण बाह्येंद्रि

बहिःकरणभावेनस्वोचितेनयतःसदा इंद्रियाणांचसामर्थ्यसंकल्पेनात्मवृत्तिना
करोत्यंतस्थितंभूयःततोंतःकरणंमनः मनोहंकारबुद्ध्याख्यमस्त्यंतःकरणंत्रिधाः
इच्छासंरंभबोधाख्यात्मवृत्तयःक्रमतोस्य तु ६६

याधिष्ठानेनचक्षुरिंद्रियाधिकारिभवति अयंचात्राभिप्रायः आत्मेंद्रियार्थसन्निकर्षेणपुरुषस्यैतदधिष्ठा
नंविनाविषयेबाह्येंद्रियाणिनप्रवर्तंतेभोक्तृपुरुषस्यभोगोपपादकं उक्तंच श्रीमन्मृगेंद्रसंहितायां
देवप्रवर्तकंशीघ्रचारीसंकल्पधर्मिचेति तत्रदेवशब्देनइंद्रियाण्युच्यंते इंद्रियाधिष्ठानत्वेचतत्रै
वसाधितं आत्मेंद्रियार्थेनैकत्वोसर्वेदेवाःप्रवर्तिताः प्रवृत्तिकारकास्तित्वंयुक्तितोप्यवसीयतेइतितत

ज्ञाविभुत्वा

श्रीः
मंत्र
रत्ना
२४

24

त्यात्मनियतनतयानेकत्वात्कार्यत्वं मनसः इति मनःसिद्धिः अंतःकरणसिद्धिमाह मनोहंकारबुद्ध्या
त्म मिति त्रिः प्रकारकं अंतःकरणमस्ति इच्छा संरंभ बोधाख्याः पूर्वोक्ताः क्रमतोस्य वृत्तयो ज्ञेयाः ७
ज्ञानेंद्रियाण्याह श्रोत्रत्वगित्यादि एषां क्रमेण शब्दादयो विषया ज्ञेयाः शब्दादिग्रहणाथानुपपत्या
एव एषां सिद्धिः ८ शब्दस्पर्शरूपरसगंधाः शब्दादयो ज्ञेयाः कर्मेंद्रियाण्याह वाक्पाणिपादपा
यूपस्थाः कर्मेंद्रियाणि अथ केषु कार्येषु इमानि करणानीत्याह वचनादागमनोत्सर्गानंदेषु कर्मसु

ज्ञानेंद्रियाणि त्वक्श्रोत्रचक्षुर्जिह्वाच नासिका ग्राह्याश्च विषया ह्येषां ज्ञेयाः शब्दादयो बुधैः ७
शब्दस्पर्शरूपरसगंधाः शब्दादयो मताः वाक्पाणिपादाः पायूपस्थः कर्मेंद्रियाणि तु ८
वचनादानगमनोत्सर्गानंदेषु कर्मसु करणानि च सिद्धानि न कृतिः कारणं विना ९ दृष्टा था
करणे चेष्टा शरीराद्यं प्रकुर्वते चेष्टा नेकार्यमालेख्याविशत्वात्करणानि तु १०

इमानि करणानि सिद्धानीत्यर्थः उत्सर्गो मलविरेकः ततः वचनादिविषयग्रहणकार्येण कर्मेंद्रियाणां राम
सिद्धिः अनश्च कर्मेंद्रियाभावभावादितो नेयायाकादयः प्रतिज्ञाः करणैर्विना कृतिसंभवो न भवति ननु २४
श्चलनो ह्नीपादीनामपि क्रियात्वात्कर्मेंद्रियानत्वप्रसंग इति च तत्र एषां त्वागेंद्रियवत् सर्वशरीर

व्यापकत्वेनाभ्युपगमो हस्तादेरेव भूक्षेपणादिव्यापारस्तत्तत्संज्ञानुतत्तदिंद्रियशक्तीनां तत्रतत्र विशेषाधि
ष्ठानादित्यविरोधः ६९ एतानि च स्थूलसूक्ष्मरूपेणेंद्रियाधाराणि स्थितानीत्युक्तं श्रीमन्मतंगे तन्मात्राणीह
कठवन्महाभूतानि चलेपवदिति अयमर्थः दशधाकरणैः दशेंद्रियैः एतत्कार्यशरीरं चेष्टां कुर्वते किं
कृत्वा एतत्कार्यशरीरमाविश्य शरीरं चेष्टाकं करोति इंद्रियाणि चेष्टां कारयंतीत्यर्थः कारणानि तु अ
विभुत्वात्कार्यशरीरमाविश्य अधिष्ठाय चेष्टते ७० तन्मात्रेभ्यश्च एवमाकाशवायुस्तेजोंभः क्ष्मा इति भूतानि

दशधाकरणैश्चेष्टां शरीरार्थं प्रकुर्वते चेष्टंते कार्यमालंब्याविभुत्वात्कारणानि तु ७० तन्मात्रेभ्यः
खपवनतेजोंभः क्ष्मेति पंच वै भूतान्येतान्येकगुणवृद्ध्या तेभ्यो भवंति हि ७१ इति पंच खशब्दो
यं स्पर्शो भूतचतुष्टये रूपं त्रिषु रसश्चैव द्वयोर्गंधस्तथावनौ ७२

भवंति तानि आकाशादीनि भूतानि एकगुणवृद्ध्या भवंति यथा शब्दैकगुणमाकाशं शब्दस्पर्शगुणो वायुः
शब्दस्पर्शरूपरसगुणो अग्निः शब्दस्पर्शरूपरसगुणमंभः शब्दस्पर्शरूपरसगंधगुणा पृथ्वी ७२ शब्दः
पंचस्वपि स्पर्शश्चतुष्टयेषु रूपं त्रिषु रसश्च द्वयोः गंधस्तु क्षितावेव तदप्युक्तं स्ववकाशादिष्टत्तिमदिति ननु
वैशेषिकादिभिराकाशविशेषगुणः शब्दः इत्युच्यते अस्य यादन्यत्रोपलब्धेस्तदप्युक्तं तस्य हेतोः प्रत्यक्षा

श्रीः
मंत्र
रत्ना
२५

25

गमबाधितत्वेन कालात्ययापदिष्टत्वात् अयमर्थः यस्य साध्याभावः प्रमाणेन निश्चितः स बाधितः स ए
व कालात्ययापदिष्टः यथा वह्निरनुष्णः द्रव्यत्वात् अत्रानुष्णत्वं साध्यं तदभावः उष्णत्वं प्रत्यक्षेण गृह्य
ते इति बाधितस्तथा शब्दः आकाशैकगुणत्वे सति श्रावणत्वात् अत्र शब्दे आकाशैकगुणत्वं साध्यं तदभावः
आकाशैकगुणाभावः स बाह्यादौ प्रत्यक्षेण श्रूयते यथा आकाशे प्रत्यक्षेण ध्वन्यात्मकः शब्दः श्रूयते वा
द्यो शंकशंकादि रमो धमधमादि जले छलछलादि पृथिव्यां घटघटादि इति इदानीं क्रमादेतेषां का
र्याणि तेषां क्रमेणावकाशो व्यूहकल्पनं पाकस्य संग्रहश्चावधारणं चेति कथ्यते २३ अशी
तोष्णो महीवाय्वोः शीतो ज्योतिर्वारि तेजसः भास्वद्गौरो जले शुक्लो क्षितौ शुक्लाद्यनेकधा २४
रूपं त्रिषु रसो भस्य मधुरः षड्विधः क्षितौ गंधः क्षितावसुरभिः सुरभिश्च मनोबुधैः २५ तन्मा
त्रेन भूतगुणं कारणेषां गुणे तथा भूतानां च विशेषार्थं विशेषपरिहितं ततन् २६
यो गुणाः अवकाशप्रदानमाकाशवृत्तिः अत्र आकाशो नित्य नस्य शब्दस्य मीमांसकमते द्रव्यत्वात् कार्य राम
कारणयोरभेदाच्च शब्दस्य श्रावणप्रत्यक्षत्वादाकाशस्यापि प्रत्यक्षमिति मीमांसकाः अयं आकाशे रूपा २५
भावाच्च न चाक्षुषं प्रत्यक्षं किंतु मानमेवेति मीमांसकाः परस्ताः ततः अवकाशप्रदानात्मना कार्येण

काशासिद्धेस्तदभाववादिनश्चार्वाकास्तन्नित्यत्ववादिनो मीमांसकाश्च प्रतिक्षिप्ताः आकाशे अष्टौ गुणाः प्रति
पुरेऽप्येकं एकं नगरमस्तीत्यत्र ज्ञेयं नतस्य नैयायिकादिभिर्विनित्यत्वमिष्यते वक्ष्यमाणवत्तन्मात्राकार्य
त्वात् कृहोपि वायुकार्याणामुपलक्षणः किंतु शब्दस्पर्शाष्टतिकं पलिंगो वायुः पाकादिलिंगो वह्निः संग्र
हस्तु जलस्य धारणेन तृप्तितः उक्तंच गंधो रसो च रूपं स्पर्शः शब्दो मही गुणाः पंच तोयादीनामेते भू
र्वपूर्वं विहाय परिपाद्यते २३ महीवाद्योः अशीतोष्णो स्वभावौ शीतोष्णौ वारितेजसोः अग्नौ भास्वद्रूपे
जले शुक्लादित्तोऽशुक्लाद्यनेकधा इति अम्लादि त्रिषु रूपं रसः समस्तु मधुरः क्षितौ षड्विधः गंधस्तु क्षिता
वेव स द्विविधः असुरभिस्सुरभिश्चेति २४ एषां भूतानां अस्मदादिबाह्येन्द्रियग्राह्यगुणत्वात् घटादिवत्का
रणपूर्वकत्वं सिद्धमित्याह तन्मात्रं तु नन्तत्भूतगुणं तस्य भूतस्य कारणं उपादानं आपूरकं पोषकं च भव
तीति शेषः ततश्च गंधादिपंचगुणात्मकं गंधतन्मात्रं भूमेः कारणं रसादिचतुर्गुणात्मकं रसतन्मात्रं
जलस्येत्यन्यस्पष्टं अनेनैषां परमाणुकारणां अभिदधानानैयायिकादयस्तत्रभू — — — २६ इमानि
पंचभूतानि सर्वतः स्थूलदेहादौ संनिविष्टानि अत एव सर्वस्थावरजंगमात्मकं स्थूलं जगत् पंचभूतात्म
कमेवेति ज्ञेयं २७ अथैतेषां सन्निवेशमाह तावत् एषां पृथिव्या एते जो वाय्वाकाशानां शरीरे संनिविष्ट

श्रीः
मंत्र
रत्ना
२६
26

त्वं निरूप्यते तदेवाह देहशरीरे अस्थिमांसकेशत्वक्नखदंतादिकं पार्थिवं अष्टधा भौतिके शरीरेवस्थिताः
७८ मूत्ररक्तकफस्वेदशुक्रादिषु जलस्य स्थितिः हृत्प्रदेशोपपंक्तौ पाकक्रियायां जननयानायां धूनमोदर्येदृ
शोः पित्ते च तेजः संस्थितं तद्धर्मदर्शनादित्येकैकस्मिन्नु योज्यं जन्न हृदि तद्धर्मस्योत्क्वस्य पंक्तौ तद्धर्मस्य
पाकस्य दृशोः प्रकाशस्य पीतत्वं संतापज्वाल्यादेहरूपलंभात् तेजः संनिविष्टमित्यर्थः ७९ प्राणापानस

इमानि पंचभूतानि सन्निविष्टानि सर्वतः चराचरात्मकं सर्वं पंचभूतात्मकं जगत् ७७ शरीरे स
न्निविष्टत्वमेषां तावन्निरूप्यते देहेस्थिमांसकेशात्वक्नखादंताश्च पार्थिवाः ७८ मूत्रर
क्तकफस्वेदशुक्राद्यास्तु जलात्मकाः हृदि पंक्तौ दृशोः पित्ते तेजस्तद्धर्मदर्शनात् ७९ प्राणा
दिवृत्तिभेदेन वायुस्तेवान संस्थितः वियत्सर्वास्तु नाडीषु गर्वहृत्यनुषंगतः ८० प्रयोजना
दि महीप्रांतमेतद्देहार्थसाधनं प्रत्यात्मनियतं भोगभेदतो व्यवसीयते ८१

मानोदानव्यानाश्चेति नागकूर्मकृकलदेवदत्तधनंजयाः दशविधा वायवः तेषां वृत्तिभेदेन वायोरवस्थितिः राम
सर्वासु नाडीषु गर्वहृत्यनुषंगतः अहंकारव्यापारानुषंगात् आकाशसंस्थितं एवं स्थूलशरीरावच्छेदका २६

वह्निनेषु भूतानां संस्थितिर्ज्ञेया ८० इदानीं कलादिक्षित्यन्ततत्त्वव्रातं सूक्ष्मदेहारम्भकत्वेन वक्तुमाह
प्रयोक्त्रादिति प्रयोजयति क्रियाशक्त्यानेनेन पुंसांसमिति प्रयोक्त्री कला तदादिक्षित्यन्ततत्त्वव्रातं
पुमर्थसाधनमेवैकस्यात्मनो नियतमसाधारणं भोगभेदात्मनीयते साधारणत्वे भोगभेदानुपपत्तेः
ननु भोगभेदे कर्मणो निमित्तत्वमित्युक्तं सत्यं किंतु न साक्षादपितु पारम्पर्येण तथाहि कर्मकृत

तत्त्वान्येवं कलाद्यानि क्षितिपर्यन्तानि तु देहेषु कर्मवशतः सर्वेषु पर्यटन्ति हि ८२
मायेयश्चैव पाशोऽयं येनावृतमिदं जगत् अणुसंज्ञामनोऽयेषः कलादिवकलावधिः ८३

स्तत्तच्छरीरभेदस्तद्भेदकृतं च भोगवैचित्र्यमित्यदोषः स तु भोगभेदः कारितुरगादिभेदाभिन्नः सूक्ष्मश
रीरवैचित्र्यं विना न भवति इत्यत्रापि कर्मण एव हेतुतेति न च कश्चिद्दोषः एतच्च सूक्ष्मशरीरं सर्वतो
हृ युगपद्वृत्तेरनुत्पादकं सर्वगं च भिन्नजातीयमप्येकफलदोपागवस्त्रवत् ननु यद्येतत्सर्वगं विभु स्या
त् नर्हि सर्वत्र यौगपद्येन वृत्त्युत्पत्तिः किं भवतु न चैवं यावता क्वचिदेकदेश एवैतद्वृत्तेः कर्मफलोप
भोगलक्षणायाः समुत्पादो भिन्नजातीयमेव एककलादिप्रत्युद्भवमपि च तद्दीपोगवस्त्रवदेकफलभ
वति यथाभिन्नकारणजन्या तैलपात्रवह्निवर्त्यादिवस्तुनमोऽन्तः दृष्टिलक्षणैककार्यसाधकमेवं तन्मा

श्रीः
मंत्र
रत्ना
२०

27

त्रामकृदहंकारकलाद्युद्भवमप्येवकर्मविभोगफलज्ञेयं ८२ अथप्रकरणांतरोपक्रमायव्याख्याता
र्थोपसंहरति तत्वान्येव एवंकलादीनांतत्वानांसृष्टिक्रमोऽत्रकः इमानिप्रतिपुरुषंनियतानीत्य
र्थः अतएवदीक्षायांसूक्ष्मदेहशुद्धिर्मायातत्वाधोभागएवस्थानेकार्येत्युक्तं तत्रेषु कर्मवैचित्र्यात्सर्वेषु
तत्रभुवनजेषुशरीरेषुपर्यटति अयंकालादिपृथिव्यंतस्तत्वगणः मायेयपाशः अनेनसर्वज्ञगुरुदाहृत
एषएवअणुप्रद्राभिधः इत्यंतत्वगणंसाधयित्वाऽद्यानींमलमायाकर्मयुतानांसकलानामणूनां मोक्षसा
धनलक्षयिष्यन् आदौनिखिलकर्मजनकत्वेनभूमंडलस्थानानामवस्थावर्णयंति ८३ तत्रेति

तत्रभूमंडलस्थोर्थः स्थावरोजंगमात्मकः स्थावरागिरिवृक्षाद्याजंगमास्त्रिविधाःपुनः ८४ स्वेद
जाश्चाण्डजाःचैवतृतीयाःचजरायुजाः चराचरेषुलक्षाणांचतुरशीतियोनयः ८५ भ्रममा
णोह्ययंतेषुकदाचिन्मानुषंवपुः प्राप्नोतिकर्मवशतःपरंसर्वार्थसाधनं ८६ तत्रापिभारते
र्वेडेब्राह्मणादिकुलेषुच महापुण्यवशेनैवजन्मभवतिदुर्लभा ८७ जातिश्चपुंस्त्रियोर्योगे
शुक्रशोणितयोगतः बिंदुरेकःप्रविशतियदागर्भोद्वयात्मकः ८८ तदारजोधिकेनारीभवत्
शुक्राधिकेपुमान् मलकर्मोदयादेवनकश्चित्स्वंयंत्रितोयदा ८९
भूमंडलस्थःप्रणत्रारोद्वयात्मकः स्थावरंजंगमस्त्वितिद्विःस्वरूपः तत्रस्थावराःगिरिवृक्षाद्यःजंगमास्त्व

राम
२०

त्रिविधाः ८४ तानेवाह स्वेदजाः स्वेदतोत्पन्नाः कृमिकीटाद्याः अंडजाः अंडतोत्पन्नाः पक्षिमाद्याः जरायुजाः
मनुष्याद्याः एतेषु चराचरेषु चतुराशीतिलक्षयोनयः संति ८५ चतुराशीतिलक्षयोनिषु भ्रममाणो हि अणुः
कदाचित्पुण्यातिशयेन मानुष्यशरीरं प्राप्नोति अत एवं परं सर्वाराधनयोग्यं परं जन्मोत्कृष्टमो लोकद्वारभूतमित्यर्थः ८६
तत्रापि भारतखंडे कर्मभूमौ ब्राह्मणादिवर्णकुले अतिपुण्योत्कर्षेण जन्म भवति ८७ जन्मप्रकारमाह पु
रुषस्त्रियोः शरीरसंयोगे शुक्रशोणितयोगात् यदा एको बिंदुः गर्भस्थाने प्रविशति द्व्यात्मकः शुक्रशोणि
तात्मकः ८८ तदा रजोधिक्येन नारी भवति शुक्राधिक्ये पुमान् भवति तस्मिन् गर्भे कश्चित् फलकर्मविपा
केन संपन्नितोणुः जीवभावं प्रतिपद्यते पाशेनेति ज्ञातित्वादेकवचनं ८९ अथानंतरं गर्भप्रवेशानंतरं
तत्र गर्भे मात्रा भुक्तैः अन्नपानाद्यैः पोषितः सः देहवान् पंचमासादिकालेन वृद्धिं प्राप्नोति ९० पुनस्तत्र सम्मु
हेः पीडितः जरायुत्तावावृतशरीरो गर्भस्थितो महत्कष्टातिशयेन पूर्वजन्मोपार्जितं शुभाशुभात्मकं कर्म
स्मरतीति ९१ सर्वकालक्रमेण सौ बालस्वायुनः प्रेरितः जननीं पीडयन् स्वयमपि संपीडितो योनियंत्राद
वाङ्मुखो निःसरति ९२ बहिरागतः क्षणं निश्चेष्टः सन् तिष्ठति ततः पश्चात् रोदितुं इच्छतीत्यर्थः ९३ ततः
दिनमासवर्षादिक्रमेण वर्द्धमानः शिशुः बालकौमारपौगंडाद्यवस्थाभेदेन वर्द्धमानो युवत्वं प्रतिपद्यते एवं क्रमे

श्रीः
मंत्र
रत्ना
२८
28

अनपायीत्याऽस्मिन्लोके ह्यणुनां देहसंभवोभवति ९४ महताकष्टेनैवंविधंमानुषत्वं मनुष्यपस्मारयतिनात्मा
नंतस्मात्पापंतरोऽधमः ९५ शरीरंसर्वलोकोपकारकंसर्वपुरुषेषुश्रयमर्थः तत्तत्कर्मभिस्तत्तल्लोकेषुनेनयति
कर्माणिलोकोऽनयतीतिश्रुतेः एवंविधंमनुष्यशरीरंसंप्राप्यपाशविच्छेदहेतुभिर्दीक्षासंस्कारैर्यस्मात्मा
नैनतारयतिसः अतह्यात्मघातएव अनस्तस्माद्न्यः पापतरोऽधकः ९६ यस्तारयतिनात्मानंतस्मात्पापतरोऽधकः
जीवभावंतदाह्यस्मिन्सकलः प्रतिपद्यते ९० अथतत्राङ्गैर्मात्रापानान्नाद्यैश्चपोषितः पत्नमासादि
कालेनवर्द्धतेदेहवानयं ९१ दुःखाद्यैःपीडितश्चैवाल्पत्वेदेहोऽनयाधुना एवंतत्रस्थितोगर्भेप्राकृत
मात्मशुभाशुभं ९२ स्मरन्तिष्ठतिदुःखात्मापीड्यमानोभुजंमुहुः कालक्रमेणबालोसौमात
रंपीडयत्यपि ९३ संपीडितोनिःसरतियोनियंत्राद्वाङ्मुखः क्षणंतिष्ठतिनिश्चेष्टःततोरोदितुमिच्छ
ति ९४ ततःक्रमेणसःशिशुर्वर्द्धमानोदिनेदिने बालयौवनभेदेनमनुष्यत्वंप्रतिपद्यते ९५ एवंक्रमे
णलोकेस्मिन्देहिनांदेहसंभवः मानुष्यंदुर्लभंप्राप्यसर्वलोकोपकारकं ९६
आहारनिद्राभयंमैथुनंचएतत्त्वनुष्टयंपश्वादीनांसाधारणंसर्वेषामस्ति अनश्वरत्वेएवानुग्रहोयःसमूढःप राम
शुतुल्यएवात्मघातकः आत्मघातकः ८० पाशबंधनविच्छेदहेतुमाह दीक्षाशक्तौवपाशबंधनविच्छेदो २८

भवति अतो दीक्षां समाचरेदिति ९६ नदेवाह आचार्याधिकरणः शिवस्यानुग्राह्यविषयो विस्तु शिव
शाक्त्यादिव्यापारो दीक्षेत्युच्यते ततो दीक्षाज्ञानादिशब्दवाच्यया शिवशक्त्यापनीतमलादिजालोऽत एव
प्रकाशितसर्वार्थज्ञानक्रियागुणः आत्मा शुद्धात्मसंज्ञिको भवति उक्तं च श्रीमद्रौरवादौ सर्वज्ञनविनि
र्मुक्ते शिरशिक्ति कलेस्थितं आत्मतत्त्वमिदं शुद्धमिति अतो दीक्षैव मुक्तेः परं कारणमिति ननु ॥

आहारश्चैव निद्रा च भयं मैथुनमेव च पश्वादीनां च सर्वेषां साधारणमितीरितं ९६ चतुर्देवानु-
रक्तो[illegible]यः सम्मूढो ह्यात्मघातकः मनुष्याणामयं धर्मः स्वबन्धच्छेदनात्मकः ९७ अतो बं-
धनविच्छित्त्यै मन्त्रदीक्षां समाचरेत् दीक्षाज्ञानाख्यया शक्त्या ह्ययं ध्वंसितबन्धनः ९८ शु-
द्धात्मतत्त्वनामासौ निर्वाणपदमश्नुते ९९ स्वशक्त्यात्मिकया दृष्ट्या शिवं ध्यायति पश्यति
यजते शिवमन्त्रैश्च स्वपरेषां च हितायः १००

ज्ञानादेरेवात्मनो मोक्षः इति वेदान्तसांख्यादयः ननु युक्तस्येमूलतण्डुलव्यापकतुष पटलादेरिव ज्ञानमात्रानि-
वृत्तिः संभवन्त्येवं चक्षुर्वैद्यव्यापारेणेव दीक्षाख्येश्वरव्यापारेणैव मलनिवृत्तिः उक्तं श्रीमत्स्वायम्भुवं दीक्षैव मो-

चयन्सर्वं शैवं धाममनुपत्स्यतीति इयं च संज्ञास्यानुग्रहोत्तरमधिकारादिनिबंधनदेहसंयोग एव ननु शिवसा
म्यरूपं परं मुक्तिप्राप्तं न तदानीमुक्तः शिवत्वेनैव व्यवहारादित्याह मुमोक्षान्माशिवसमर्थतया स्वशक्त्यात्मि
कया दृष्ट्या शिवसंध्यायति पश्यति च तत्राचार्याधिकाररूपेण तया द्यात्मोपकाराय च शिवादिमन्त्रैर्यजति १००
शिवार्कोति शिव एवार्कस्तस्य शक्तिदीधित्या शक्त्यात्मिकाया आवृतिर्यस्य अत एव यानं जलाद्यत्र कवतत्त्वाद्यादि

शिवार्कशक्तिदीधित्या समग्रीकृतविग्रहा शिवशक्त्यादिभिः सार्द्धं पश्यत्यात्मगतावृतिः १०१
अंतःकरणवृत्तिर्या बोधाख्या सा महेश्वरं न प्रकाशयितुं शक्ता पाशत्वान्निगलादिवत् १०२
दीक्षैव परमे हेतुः पाशविच्छेदने पुनः अतः शास्त्रोक्तविधिना मंत्रदीक्षां समाचरेत् १०३ दी
क्षितस्तेन विधिना स्ववर्णाचारतत्परः अनुष्ठाने प्रवृत्तोऽत्र नित्ये नैमित्तिकात्मके १०४ निजव
र्णाश्रमाचारान् मनसापि न लंघयेत् यो यस्मिन्नाश्रमे तिष्ठन् दीक्षां प्राप्नोति मानवः १०५ स
तस्मिन्नाश्रमे तिष्ठेत्तत्तद्धर्मांश्च पालयेत् कृतान्यपि न कर्माणि बंधनाय भवंति हि १०६

विषयत्वं तस्य शिवस्य न संभवति तस्य पाशागोचरत्वात् १०१ तदेवाह बोधाख्याया अंतःकरणवृत्तिः सा पा
शत्वान्महेश्वरं न प्रकाशयितुं शक्ता निगडादिवत् अतः शिवशक्त्या एव शिवशक्त्या एव शिवप्रकाश इत्यर्थः
१०२

साप्रकाशकत्रीशक्तिदीक्षयैवजायते अतोह्येव पाशविच्छेदनहेतुः अतःशास्त्रोक्तविधिनानन्तुप्रकारक
पाषंडाद्युक्तविधिना मंत्रदीक्षांसमाचरेत् १०३ अनन्तरोक्तविधिदीक्षातोयं नित्यनैमित्तिकात्मकं अनुष्ठा
नंकुर्यात् स्ववर्णाचारतत्परः ननुपाशुपतिमिवस्ववर्णाश्रमधर्मत्यागः स्यात्ततः १०४ नदेवाह यः यस्मि
न्नाश्रमनिष्ठन् सदीक्षांप्राप्नोति तस्मिन्नेवाश्रमेतनजन्मान्तरं वैमनवैशैवादिधर्माननुपालयन्नतिष्ठेत् १०५
ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिश्रुत्या कर्मणः शारीरयोगादिफलजं दीक्षोत्तरकालेविहितत्वेनात्र
मंत्रानुष्ठानसंभवं दीक्षितोभिलषेद्भोगान् यद्यल्लोकगतानसौ मंत्राराधनसामर्थ्यात्तद्भुक्त्वामोक्षम
श्नुते १०७ संप्राप्य दीक्षांसमयाचारं योनाचरेन्नरः किंचित्कालंपिशाचत्वंप्राप्यतेमोक्षमश्नुते १०८
तस्मात्तु दीक्षितः कुर्यान्नित्यनैमित्तिकादिकं अनुष्ठानं चतेनास्य दीक्षाप्राप्त्यानुमीयते १०९ विशु
द्धसमयाचारपालकस्य नरस्य तु दीक्षा चैव कल्पविरहान्मोक्षोभुक्तिस्तुजायते ११० तत्राविगु
रुभक्तानांस्युगतिर्भवतिनान्यथा दीक्षया गुरुमूर्तिस्थः सर्वानुग्राहकः शिवः १११
क्रियमाणन्तु मंत्राराधनादिकर्म सफलमेवेतिज्ञेयं तदेवाह असौदीक्षितः यद्यल्लोकगतान्भोगानभिलषति
तान्मंत्राराधनसामर्थ्यात्तल्लोकभोगान्भुक्त्वाश्मोक्षमश्नुते तदुक्तं स्वायंभुवे योयत्राभिलषेद्भोगान्स्तत्रैव नि

श्रीः
मंत्र
स्तो
३०

योऽञ्जित इति ९७ दीक्षां संप्राप्य यः समयाचारं नाचरेत् अयमर्थः अत्र हि दीक्षोत्तरकालः नानार्चनादिस
मयाचारानुष्ठानेनारब्धे पाशत्रयः अत्यहमयं यंपेत क्रियते नः सापेक्षदीक्षाभाजा गुरुशुश्रूषाशिवार्चनादिया
वत्शक्त्यमनुष्ठेयं यस्तु दीक्षोत्तरं नित्यादिकर्मानुष्ठाने प्रमादेन कुर्वंति ते किंचित्कालं पिशाचतां प्राप्य देहे
मोक्षं प्राप्नुवंति तस्माद्दीक्षां प्राप्य नित्यनैमिक प्रायश्चित्ताद्यनुष्ठानं कुर्यात् अत एव तदधिष्ठाने न दीक्षा निष्प
त्तिरनुमीयते ९८ विशुद्धः पार्षदैः सहितः समयाचारपालकस्य नित्यनैमित्तिकाद्यनुष्ठानतत्परमदीक्षावै
कल्याद्रहितस्य मलपरिपाकबलेन तस्य देहपातानंतरं मोक्षः ९९ अयमर्थः तीव्रतशक्तिपाताद्वारीनु दीक्षा
वैकल्येनापि समयोल्लंघने यस्य तस्य देहपातानंतरमेव मोक्षो भवति उक्तं च प्रायश्चित्तविशुद्धस्य गतिः श
ह्वात्रकीर्तितेति १०० यस्य तु मलत्रवरिपाकमांद्यान्मंदतारादिशक्तिपातस्य दीक्षोत्तरं देवाग्न्याद्युपाद्या हा
यित्वाति बलात्समयोल्लंघनं समुत्पद्यते तत्रापि यथोक्तविधिना गुरुभक्तिपरायणः अस्य गुरुसपर्यायुक्तव
त्वागतिर्भवति अन्यथा नष्टानंतरस्यापि गुरुर्भवति स एव सर्वानुग्राहकशिवः गुरुमूर्तिस्य एव अ
तो गुरुभक्तिरेव मुख्योति तात्पर्यः १०१ यस्य तु दष्टाधिंतयाकांचिंमगुरुभक्त्यादिना कृतदीक्षात्यनुष्ठिते राम
पि समयाचारे सर्वं व्यर्थमेव भवति अयमर्थः गुरोः कस्मिंश्चिमभक्तस्यानुपमाने देवार्चनादिकर्म विकलमेव ३०

भवति पदे पदे च प्रायश्चित्ती भवति १२२ कायेनेति कायत्वानोभि गुरुभक्तिपरायणस्य शिवेस्य कावि
न्य नैमित्तिकाहि यातेपि ज्ञातेपि प्रायश्चित्तं न भवति तादात्म्यात् शिवोपासनत्वात्तस्य पदे सिद्धिरेव भव
ति उक्तं च कायेन मनसा वाचा यो भक्तः श्रीगुरौ गुरौ न तस्य सिद्धिर्भवेदाशु नान्यथा कल्पकोटिभिः ॥

ह [illegible]र्थितया यस्य गुरुभक्तिश्च कार्येषा कृतेपि विकल्पे न तस्य प्रायश्चित्तं पदे पदे १२२
कायेन मनसा वाचा गुरुभक्तिर्यस्य च प्रायश्चित्ते न भवेन्नैव सिद्धिस्तस्य पदे पदे १२३
गुरुभक्तियुते शिष्ये सर्वस्वविनिवेदके मिथ्याप्रयुक्तमंत्रस्तु प्रायश्चित्ती भवेद्गुरुः १२४
इति श्रीमत्सर्वज्ञाचार्यचरणसरोजनिवसितमनश्चञ्चरीकास्वादितविमलकरंद
श्रीमद्विजयरामाचार्यविरचिते मंत्ररत्नाकरे प्रथमः तरंगः १ शुभमस्तु ॥

अन्यच्च श्रीगुरुप्राकृतेः सार्धं यः स्मरति भजते च तेषां हि सुकृतं सर्वपातकं च भवेत् तृणादिति १२३
गुरुभक्तियुते शिष्ये मिथ्याप्रयुक्तमंत्रो गुरुः प्रायश्चित्ती भवति अयमर्थः सर्वलक्षणसंयुक्तं शिष्यं
मिथ्याप्रयुक्तमंत्रो गुरुः प्रायश्चित्ती भवति कल्पितमेव दर्शितं शास्त्रविरुद्धधर्माचरणे प्रवृत्ते योजयति अमार

श्रीः
मंत्र
रत्ना
३१

कोशाय स्त्रीति भवति नरकगामी भवति ॥ इति श्रीमन्मंत्ररत्नाकरमहापोते श्रीमद्द्विजजय
रामाचार्यकृतो प्रथमस्तरंगः टिकाविवरणं समाप्तं श्रीसंवत् ॥ पुस्तकमेतद्द्विजयरामाचार्याणाम्
अयोध्यापुरीतः श्रीमत्तीर्थराजे [redacted] प्रेषितम् ॥ ॥ श्रीतीर्थराजो जयतितराम्

31

राम
३१